अथ

“वेदान्तकल्पतरुः” ।

अमलानन्दसरस्वतीप्रणीतः ।

Vedanta Kalpataru.

॥ वेदांतद्वितीयाध्यायकल्पतरु ॥
यमाजीदीक्षितानां

अमलानन्दप्रणीतवेदान्तकल्पतरुः।

अध्यायः- २. (पादः-१-२ तक)

॥श्रीगणेशायनमः॥ ॐ स्मृतिप्रसंगात्। चेतनं न जगदुपादानसमन्वयः सांख्यस्मृत्या संकोच्यतां न वेति स
र्वज्ञभाषितत्वसाम्येन वल। वलाविनिगमात्संदेहे पूर्वपक्षमाह। न खल्विति। विरोधेत्विति॥ औदुंबरी
स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धा सर्वा मा वेष्टेतेति स्मृतिर्मानं न वेति संदेहे वेदार्थानुष्ठातॄणां स्मृतिकि
मूलश्रुत्यनुमानात्प्रत्यक्षानुमितश्रुत्योश्च स्वपराधीनश्रुतिवत्समवलत्वादुदितानुदितादिवद्विकल्प
दिसंभवान्मानमिति प्राप्ते राद्धांतः। श्रुतिविरुद्धस्मृतीनां प्रामाण्यमनपेक्षमपेक्षावाजितं हेयमिति यावत्।
॥१॥ यतोऽसति विरोधे मूलश्रुत्यनुमानं। स्वपराधीनश्रुत्योस्तुल्यत्वे वैमितत्वात्समवलता। प्रत्यक्षश्रुति
विरुद्धे त्वेतु न श्रुत्यनुमानमर्थापहारेण मानस्यापहारादतो मूलाभावादप्रमाणमिति। पूर्वपक्षीपूर्व
पक्षोपपादकः अधिकरणारंभवादीत्यर्थः। आर्षप्रत्यक्षमूलापि स्मृतिः सापेक्षा वेदस्त्वपौरुषेयत्वादन ॥१॥
पेक्ष इत्याशंक्याह अयमस्यापि संधिरिति। ज्ञानसिद्धास्य भावसिद्धावस्याऽनावरणाभूतार्थमात्रगोचरा
भ्रमवत्त्वसत्त्वानृतगोचरत्वं वारयति मात्रेति। एवंभूतात्तस्य ब्रह्मणो यो बुद्धिस्तत्पूर्वको वेदराशिरित्यर्थः॥
पौरुषेयत्वेन तुल्यत्वमुक्त्वा स्मृतेर्निरवकाशत्वं प्राबल्यहेतुमाह नचैता इति। अनन्यपरत्वं। स्फुटतर
त्वं श्रुतिस्त्वनुष्ठानपरा अन्यस्मृत्यनुनवकाशमात्रान्नसिद्धांतसिद्धिः संदेहादित्याशंक्याह यथाहीत्या

दिना। देवताधिकरणे योगिप्रत्यक्षस्य समर्थितत्वात् ज्ञाप्यमस्मदाद्युक्तिश्रापमित्याह। अर्वागिति। कपिलादयो अर्वा
चीनपुरुषविलक्षणा इत्याशंक्याह। न तावत्कपिलादय इति। प्राचिनैरवेतदनुष्ठानवतामिति संबंधः। तच्छब्देन
वेदार्थो विवक्षितः। पूर्वोक्तमिति विप्रतिपत्तौ वेत्यादि भाष्येण पूर्वोक्तं स्मारयतीत्यर्थः। आकृतिसामान्यमात्रे
णेति सगरपुत्रप्रतप्तुः सांख्यप्रणेतुश्च कपिल इति शब्दसाम्यमात्रेणेत्यर्थः। यथा नृत्यं कुर्वत्यपि नर्तकदृ
ष्टिर्न क्रमेणैव नृत्यतीति न स्वतंत्रा एवमीश्वरः प्राचीनक्रममनुरुध्य विरचयन्वेदं न स्वतंत्रः क्रमोपगृहीत
वर्णात्मा च वेदोऽर्थप्रमितिकर इति न वक्त्रपेक्षमस्य प्रामाण्यमित्याह सत्यमिति। फलितमाह तेनेति। येना
नादिः कार्यकारणभावस्तेन न प्रागभूतस्य शास्त्रस्य तदर्थज्ञानपूर्विकाकृतिर्न वा क्रिया किंतु नियतक्र
मस्य तस्य संस्काररूपेणानुवर्तमानस्य स्मरणेनाभिव्यक्तीकार इत्यर्थः। ननु नर्तक्यादिवदत्र ईश्वरस्ततः
शास्त्रक्रियातः प्रागेव तदर्थज्ञानवत्त्वात्कपिलतुल्यः किं न स्यादत आह शास्त्रार्थज्ञानं वेति। वर्णानुपू
र्वीति शास्त्रं तथा च यदा तदर्थः स्फुरति तदैवानुपूर्व्यपि संस्काराद्रूढा स्फुरतीत्यादर्शात्मकशास्त्रस्य
रूपमात्रज्ञानात्तत्करणोपपत्तौ न शास्त्रार्थज्ञानस्य हेतुत्वमित्यर्थः। स्वकृतप्राचीनदर्शापेक्षत्वात् माणवक
वैलक्षण्यमीश्वरस्य शास्त्रस्य वक्तृज्ञानाजन्यत्वेपि नांतरीयकत्वे न शास्त्रस्फुरणे तदर्थस्फुरणात्सर्वे

ज्ञेश्वरसिद्धिः। तदर्थज्ञानवत्ताचप्रष्ठ्यान्तरितश्रुतेः ज्ञातृत्वात्सिद्ध्यतीशस्य नहि माणवकेस्तित नु। ज्ञाति
त्वेवं शास्त्रयोः। नित्यशास्त्रविषयाधिकविषयविज्ञानवत्त्वयो व्याप्तिः कुत्रचित्किंतु दृश्यते हिण्यासत्वेवत्त्राव
निपतनभावत्वरूपानु शास्त्रार्थज्ञानशास्त्रकरणयोर्हेतुमत्त्वकृता। ननु गुणवद्वक्तृज्ञानजन्यत्वाभा
वे कथं शास्त्रस्य प्रामाण्यमिति चेत्स्वतस्त्वादिह शास्त्रं चेति। प्रमाणानां प्रामाण्यस्य स्वतस्त्वात्। ननु कपिलादि
वचसां तथा किं न स्यादत आह कपिलादिवचांसि त्विति। तेषां कपिलादिवचसां सामर्थ्यादेवार्थापत्तौ ताः स्मृ
॥२॥ तयस्तथोक्ताः। तासां स्मृतीनामर्थादेवार्थापत्तेषामनुभवानां तेतदर्थानुभवास्ते पूर्वापासांताः स्मृतयस्तथो
क्ताः यथानपेक्षत्वेन शीघ्रतरप्रवृत्तश्रुत्या तद्विरुद्धलिंगस्य श्रुतिकल्पनापेक्षत्वेन विलंबितप्रवृत्तेः पू ॥२॥
रिच्छेदकत्वमपक्रियत एवमनपेक्षश्रुत्या तद्विरुद्धकापिलवचसः सापेक्षत्वेन विलंबितः प्रामाण्यमप
क्रियत इत्यर्थः। यावदिति कथं विदितस्यैः। दौहित्रस्य कर्म दौहित्र्यं। वंध्याचेऽस्मरे दिदं मे दौहित्रेण
कृतमिति सा स्मृतिरप्रमाणं मूलस्य दुहितुरभावादेवमत्रापि मूलभूतानुभवाभावात् स्मरणाभावइ
त्याहवंध्यायाश्चेति। न त्वार्वमिति। उपजीव्यवेदविरोधयोक्तत्वादित्यर्थः॥ अथ यत्क्रेशानाद्धीयते। अद्वै
तसर्वस्येति। प्रश्नबलस्यस्मादितिप्रष्ठीयते आस्मिन्निति वप्रभवप्रष्ठयोः तस्मादात्मनो अधिष्ठातुः प्रभवेति।

सः मूलमुपादानं । शाश्वतिकोऽनादिः नित्योध्वंसवर्जितः तानैः पुरपतियः सर्वेषामात्मापुरुषाजीवाः बहूनां
देहानां योनिः पृथिवी विश्वं पूर्णगुणैः सर्वज्ञत्वादिभिरधिकं सर्वोत्तमत्वाद्विश्वमूर्द्धादित्वं ॥४०॥ एतेन । एषां है
रण्यगर्भादिशास्त्राणां । योगस्वरूपं चित्तवृत्तिनिरोधस्तत्साधनं यमादि । तदवांतरफलं विभूतिरणिमादिः किं
चिन्निमित्तीकृत्येति । चित्तनिरोधोऽहि कार्यद्वारा वर्णनेन निवेशाद्भवति । पुरुषे चस्वरूपे ज्ञानं निवेशासंभवात् प्रधाना
दिचित्तावलंबनत्वेन व्युत्पाद्यत इत्यर्थः । प्रतिसर्गः प्रलयः वंशानुचरितं तत्कर्मतत्प्रतिपादनेति तच्छब्देन
केवल्यादिपरामर्शः । देवताधिकरणन्यायेन प्रधानादेरप्रामाण्यमाशंक्याहान्यपरादपीति । मृतएव प्रधानादेर
विवक्षातएव । गुणानां सत्वादीनां परमं रूपमधिष्ठानमात्मा । दृष्टिपथप्राप्तं दृश्यं प्रधानादि । मायेव मिथ्या ।
तत्सुतुच्छकं सुतुच्छकमिति । अर्थात् । द्वावतात्पर्ये योगशास्त्रस्यानुवादकत्वं वक्तव्यं तत्कथं प्रामाण्यभावादि
त्यत आह लोकसिद्धानामिति । वैदिकलिंगाभासन्यायाभाससिद्धानामनुवाद्यत्वमित्यर्थः ॥ अष्टकास्मृति
वदिति । अष्टकाः कर्तव्या इत्याद्याः कंरवनितम्नमित्याद्भिस्मृतयोऽनप्रमाणं । धर्मस्य वेदैकप्रमाणत्वाद्दृष्टकादिश्रेयः
साधनत्वे वेदानुपलब्धात् स्मृतेश्च भ्रांत्यापि संभवादिति प्राप्ते राद्धांतितं । वेदार्थानुष्ठातृणामेव स्मृतिषु स
निबंधनात्सुकर्तृत्वात् मूलभूतवेदमनुमापयंत्यः स्मृतयः प्रमाणमिति । तत्कारणं सांख्ययोगाभिपन्नमि
ति श्रुतौ सांख्ययोगशब्दाभ्यां ज्ञानध्याने निर्दिष्टे इत्यर्थकं भाष्ये तदुपपादयति सांख्येति । कथं चित्तवृत्तिनि

शेष वा ति योगशाद्देनचिंता रूपं व्याख्यानमुच्यते तत्राह उपायेति॥ शरीरश्री वा शिरांसि त्रीण्युन्नतानि यस्मिंस्तत्तथा। ए
तां ब्रह्मविषयां विद्यां योगप्रकारं च मृत्योर्लब्ध्वा नचिकेता ब्रह्मप्राप्तो ऽभूत्। एको बहूनां यो विदधाति कामानित्य
पक्रम्य श्रुतं तत्कारणमिति तेषां कामानां कारणं ज्ञानिनि ध्यानिनिष्ठिध्यप्राप्यं देवं ज्ञात्वा मुच्यते॥४१॥२॥ न शाद्यान्
चेतनोपादानकं जगदादित्समन्वयस्य जगनादिन चेतनप्रकृतिकं इयत्वाद्घटवदित्यनुमानेन संकोचसंदेहे विद
॥७॥ किरहस्मृतेर्मूलाभावाद्प्रमानत्वमुक्तं अनुमानमूलं तु व्याप्तिपक्षधर्मते लोकसिद्धे रत्युत्तराधिकरणस्तो भस्यस्य
स्याधिकरणेन संगतिमाह अथवांतरेति। वेदविरुद्धार्थत्वेन स्मृतेस्त्वद्वैलक्षण्यादेतन्मूलत्ववद्ब्रह्मवैलक्षण्या
द्रागदप्यतन्मूलमिति। निरंतरसंगतिः। एकश्रुत्यनुसारेणेतरश्रुतिनयनदृष्टांतमात्रात् केवशेन श्रुतिसं ॥७॥
कोचो न युक्तः वैपरीत्यस्यापि संभवादित्याशंक्याह सावकाशा इति। श्रुतीनां निमित्तकारणे सावकाशत्वं तर्कस्या
नोपाधिकत्वेनानवकाशत्वं। दृष्टं साधर्म्येणेति। प्रत्यक्षदृष्टांततुल्यत्वेनानुमानात्यक्षेगमितेतस्यापि प्रत्यक्ष
तासंभाव्यतरत्यर्थः। तर्कमाह प्रकृत्येति। ब्रह्मसारूप्यं जगतो दर्शयति विकृत इति। प्रधानसारूप्यमुपपादय
सेकइति। आनुश्रविके पि सुखाद्यात्मत्वमाहस्य गेति। निरतिशयत्वादागमापायिधर्मराहितत्वादित्यर्थः। जगतोऽ
चेतनत्वस्य श्रवणमपि चेतनव्यानक्ति व्यक्तिपरमिति शंकापाकरणार्थं भाष्ये ऽनवगम्यमानग्रहणं। ध्यायत्येव शब्दाची
दिति। आर्थस्य जगच्चेतनत्वस्य श्रुताचेतनत्वबाधकत्वायोपष्टंह कलोकानुभवाभावो ऽनवगम्यमानपद

द्योतित इत्यर्थः। आर्थत्वेऽपो द्वळकापेक्षा तद्देव नेत्याह। न पृथिव्यादीनामिति। श्रुतार्थापत्त्यनुगृहीतश्रुतिसिद्धजगद
चेतनत्वश्रुतयश्चैतन्यानभिव्यक्तिपरत्वेन व्याख्येया नामिति। श्रुतार्थापत्त्यनुगृहीतश्रुतिभिरित्यर्थः। प्रथमेऽध्याय
ईक्षत्यधिकरणे इति। मुख्यतयेति ऐक्षतेत्यस्य मुख्यत्वं तेजआदिशब्दा ळक्षणिका एवा तदिदमुक्तं कथंचिदिति।
साध्यासाधकः पक्ष एव वर्तमानो साधारणः। यथा सर्वं क्षणिकं सत्वादिति एवं चैतन्यानभिव्यक्तत्वप्रपी स्यात्हेतू=
तीयस्त्विति। प्रमा तिप्रमाणविजयस्य बच नव्यतयाभासनिरासेन विवेचकतयेत्यर्थः। श्रवणस्य पश्चादित्यसंभा
वनानिरासकत्वाचारंभणत्वादितर्कप्रतिप्रायं मननस्य साक्षात्कारांगत्वं ध्यानव्यवधानेनेत्याह। मतो हीति। अ
चेतनस्य जगत्कारणस्य सर्गात्तरकाळे विज्ञानात्मकजीवरूपतानसंसृविनीत्यर्थः। प्रागुक्तहेतुः कारणस्य सत्वात्त
दभिन्नं कार्यं कथमसदित्याह न कारणादिति। यदुक्तं न कारणात्कार्यमभिन्नमिति तत्राह प्रतिपादयिष्यतीति।
पृच्छुर्भो दराकासदिस्वरूपेण कार्यं कारणान्न भिन्नं नाप्यभिन्नं सन्न वा सदिति तस्मा रूपेणास्विति। यूषण शाकस्पर
सः दूषयतीति मिश्रयति न नु घटादिळये यथा मृदो न तद्दूषणमेवमिहेत्यत आह न चान्यथेति। निरन्वयनाशान
भ्युपगमादीषदनुवर्तमानस्यान्यथा ळयो न ळोकसिद्ध इत्यर्थः। निरन्वयनाशवादिनः कार्यधर्मा दूषणं कारणे
स्यान्न तावत्या शंकते स्यादेतदिति। कार्यस्य कारणतावन्मात्रत्वात्कारणानुवृत्त्या सान्वयनाशोक्तिरस्माकी
स्ताह यथा रजतस्येति। ळौकिकः पुरुषो जीवोऽतश्च न साध्यसमत्वमित्यर्थः। जगत्कारणस्य जाग्रदाद्यभा

वाह्यावच्छेदेउत्पत्तीति। उपरिष्टादिति अनंतरमेव शिष्टापरिग्रहाधिकरणपूर्वपक्षे। सर्वैस्तर्कैरप्रतिष्ठितत्वात् कश्चि
न्नश्चरमेरस्मात् ऊहनानुमानाभ्यासे तिरश्चाभाविकप्रतिबंधो व्याप्तिः। नाप्यस्मात् ऊहापि चेति। चरमोनकेवलमविरुद्धः
प्रस्फुतानुगुण इत्याह अपि चविचारेति। नैषेति। एषा ब्रह्मविषया मतिस्तर्केण नापनेया नापनीया न आपणी
येत्यर्थः। अथवा कुतर्केणापनेया निरस्या न भवति। किंतर्ह्यन्येनैवाचार्येण प्रोक्ता सती सुज्ञानाय फलपर्यं
तसाक्षात्काराय भवति। हे प्रेष्ठ प्रियतमेति नचिकेतसं प्रति मृत्योर्वचनं। क अद्धा साक्षाद्वेद ब्रह्म को वा प्रावोचत्
छंदसि कालानियमात् प्रब्रूयादित्यर्थः। इयं विसृष्टिर्यत आबभूव सएव स्वं रूपं वेद नान्यः इति मंत्रप्रतीकयो
॥४॥ रर्थः। प्रकृतिरूपः अविद्यादिरूपेत्यर्थः। तं सर्वं पराद्दाग्निराकुर्यात्। योन्यत्रात्मनः आत्मव्यतिरेकेण सर्वं वेदेत्यर्थः। ॥४॥
अजं जन्मरहितं अनिद्रं स्वप्नरहितं अस्वप्नं भ्रमरहितं मतत्स्वा इत्तं तद्दा बुध्यत इति संप्रदायविद्वचनार्थः
॥ग॥ एतेन व्याख्याता। अतिदेशस्योपदेशवत् संगतिः। यथा हि वेदविपरीतत्वात् सांख्यादिस्मृतिरतन्मूला ए
वं ब्रह्मकारणवैपरीत्यात् न्यायानुगम्यन्ते न्मूलं न्मूलत्वे हि ततो महत्सान्न्यालभ्यमिति। अत्यथि तुल्यत्वाच्छंका
यामतिदेशः स्यादितीतिमाह न कार्यमिति। रयमारंभणाधिकरणे निरसिष्यमाणाप्युपचयत्वेन हनि
दिश्यते। यानुवक्ष्यते उपादानत्वं च कारणस्य कारणस्य कार्यादभेदपरिमाणस्येव दृष्टमिति सेवैतदधि
करणनिरस्येति। अस्य कार्यस्येत्यर्थः। कुलालादिव्यापारात् प्राक् मृत् घटरहिता। तदानीं योगस्त्वेस

स्यनुपलभ्यमानघटत्वात् गगनवत्। ततश्चासत्त्वात्सत्त्वविरोधान्न कार्यकारणयोरैक्यमित्याह किंचेति। येनेति।
अर्थगतप्रत्यक्षपरोक्षत्वेनेत्यर्थः। घटादिकार्यस्य प्रागुत्पत्तेः सत्त्वमानमसदकरणादित्याद्यनुमानं तदुपलभ्यो
ऽनुमितिरनुमानं। जगतस्तु प्रागवस्थाया मागम उपलभ्य आगमः। यद्यपि यदि भिन्नो मृदस्तर्हि तत्कार्यं न स्याद्दृश्यव
दिति तर्कस्य सततो यद्यभिन्नस्तर्हि तत्कार्यं न स्यान्मृद्वदिति प्रतिरोधं मुक्त्वा मूलशैथिल्यमाहास्येतेति। ननु यदि कुं
भात् कुंभकारमृदो ऽरस्यं तत्के दस्तर्हि कथमुपादाननिमित्तत्वावस्था ऽ तत आह तस्मादिति परमाणोरपि मूर्तत्वात्
क्षुद्र तशं तशरभ्यत्वमतो न क्षुद्रत्वविश्रांतिरत आह ज्योदीयोनरेति। सहस्रसंवत्सरेति। पंचपंचाशतः त्रिवृतः सं
वत्सराः। पंचपंचाशतः पंचदशाः पंचपंचाशतः सप्तदशाः। पंचपंचाशत एकविंशाः विश्वसृजां सहस्रसंवत्सर
मुपयंतीत्यत्र संवत्सरशब्दस्योत्पत्तिवाक्ये मुख्यार्थलाभात् तावदायुष्करत्वादि सिद्धमनुष्याद्यधिकारता
माशंक्य षष्ठे सिद्धांतितं। प्रकृतौ हि द्वादशाहे त्रयस्त्रिवृतो भवंति त्रयः पंचदशाः त्रयः सप्तदशाः त्रय एकविंशाः
इति त्रिवृदादिशब्दास्त्रिवृदादिस्तोत्रविशिष्टाहः पराः समधिगताः। एवं चात्रापि पंचपंचाशतस्त्रिवृतः संवत्सरा
र स्याद्युत्पत्तिवाक्येष्वहः परत्रिवृदादिशब्दैर्निश्चितार्थैः सामानाधिकरण्यात्संवत्सरशब्दस्य स्वपंसौरवांश
दिनानोपाधित्वेनानिर्धारितार्थस्याहः परत्वेव। एवं चोत्पत्तिमात्रोच्यसहस्रसंवत्सरशब्दोपि सहस्रदिवस
साध्यकर्मपरः। औषधादिसिद्धिकल्पनाप्येवं न भवति तस्मान्मनुष्याधिकारतेति। आरंभे हि न्यूनपरिमाणा

न्मह दुरूयनियमो न विवर्ते। उच्चैस्तरगिरिशिखरवर्तिमहातरुरूपभूमिष्ठस्य दूर्वाकारनिर्भासप्रतिभासोपलम्भा
दित्याह अविद्यासमारोपेणेति।।४३।।४४ भोक्तापत्तेः। अद्वयब्रह्मणो जगत्सर्गवादिनः समन्वयस्य भेदग्राहिमान
विरोधसंदेहे संगतिगर्भमगतार्थत्वमाह प्रवृत्ता हीति।। पूर्वत्र जगत्कारणे तर्कोऽप्रतिष्ठित इत्युक्तं तर्हि जगा
द्भेदे तर्कः प्रतिष्ठित इति अद्वैतविरोधेन प्रत्यवस्थानात्संगतिः। अत एव लब्धप्रतिष्ठितर्केणेत्युक्तं मुखनिरो
धगतार्थत्वं चेत्यर्थः। प्रवर्तमानेति। स्वविषयप्रतिष्ठविरोधितर्केण सहोन्मज्जननिमज्जनमनुभवतीव लब्धाव ल
विवेकमपेक्षमाणेत्यर्थः। एतद्वैधर्म्यं चप्रदत्तत्वं तर्कस्य प्राबल्यमाह स्फुटतरेति। स्थूलनीलादिभेदगोचर
 त्वात् स्फुटतरत्वं। प्रतिष्ठितत्वमनुपप्लवरितत्वं आम्नायोत्युपचारेणापि सावकाश इति। वर्तमानविभागेनापि ।।५।।
विरोध इति हेर्वर्तमानसाम्योपपादनमतीतानागतयोर्व्याख्येऽनुपयोगीत्याशंक्य वर्तमानविभागसत्यत्वं फलमि
त्याह यदीति।।४४।। तदनन्यत्वं भ्यः। पूर्वाधिकरणेपि भेदग्राहिमानाविरोधोक्तेः पुनरुक्तिमाशंक्याह पूर्वत्रा
दिति। अंगीकृत्य हि भेदग्राहिमानस्य प्रामाण्यं भेदाभेदयोरूपभेदेन विरोधः परिहृत इदानीं तु स्वीकृतं प्रामा
ण्यं तत्त्वावेदकत्वात् प्रच्याव्य व्यावहारिकत्वे स्थाप्यतो एवंभूतेन विरोधाभिधाने नोपक्रमो यस्य विरोधपरिहारस्य
स तन्योक्तस्तदनन्यत्वपदेनद्वैतमिथ्यात्वोक्तेरेवमुपक्रमत्वं। अतो परिणामिमृदादिदृष्टांतोपादानोत्र भेद

भेदविवक्षेति मतत्वं एकविज्ञाने न सर्वविज्ञानप्रतिज्ञायाः प्रधानस्यानुरोधे न गुणभूतदृष्टांतस्य विवर्तपरत्वेन
नेयत्वादित्याह एवं हीति। ननु परिणामपक्षेप्यभेदांशे न सर्वज्ञानं स्यादत आह तत्त्वज्ञानं चेति भेदाभेदाङ्गीक
तायाउक्तत्वादित्यर्थः। उपपादितमथ स्वादिनि शिष्टापरिग्रहाधिकरणपूर्वपक्षे इत्यर्थः। दृष्टान्तमात्रान्नार्थसि
द्धिरिति शंकते हेतुरुक्तो दृष्टेति तं व्याचष्टे ये हीति। कदाचिद्दृष्टं पुनर्नष्टमनित्यमित्यर्थः। दृष्टग्रहणं प्रतीतिसमयेपि
सत्त्वमात्रस्यार्थव्यतिरेकव्याप्तिमाह यदस्तीति। विमतं मिथ्या व्यासावधिकत्वात् व्यतिरेके दोवित्मवत् इ
त्यनुमानस्य विपक्षे बाधकतर्कमाह सत्त्वभाव चेदिति सत्त्वासत्त्वे विकारस्य स्वरूपमुत धर्मो अन्यो वाऽर्थांत
रमलीकं वेति विकल्प्यक्रमेण निराकुर्वन्ननुमानस्यानुकूलतर्कमाह सत्त्वभावं चेदित्यादिना। अर्थांत
रत्वे तु विरोधिभूतत्वं शंकते असत्त्वमिति। विरोधिभूतमसत्त्वं भावस्य किमकिंचित्करमुतासत्त्वकरं स्वरूपं
वेति विकल्प्यक्रमेण दूषयति नेत्यादिना। किंचित्करत्वे यत्किंचिदसत्त्वं क्रियते। न दपि स्वरूपं धर्मो वेत्यादि दि
कल्पतत् दूषणानां संभवादित्यर्थः। असत्त्ववत्सत्त्वेप्यर्थांतरत्वादिविकल्पा दुष्टव्याः। अर्थांतरसत्त्वाद
पि विकारे फलाभावात् सत्त्वांतरजन्मनि वानवस्थानात् विकारे सत्त्वांतरं न भवति किंतु स एव सन् भवती
त्युक्तेपि सत्त्वभावस्यासत्त्वविरोधे न विकारनित्यत्वापातादिति। ननु कार्यमिथ्यात्वं कारणसत्यत्वं वानु
मानसिद्धं श्रुत्या दृष्टांतीकर्तुमयुक्तं लोकसिद्धस्य दृष्टांतत्वोक्तेरित्याशंक्याह यत्रेति। मृदो का शरावाद्यः

कल्प २

परस्परभिन्नादस्मत्प्रत्ययगमेऽस्त्यं न भेद एवं स्यादयमुदात्मनाशरीरवादीनामेकत्वमहङ्कारादिवाद्यात्मनाना
नात्वमिति मतं तद्विकल्प्य दूषयतीदं तावदित्यादिना। असंताभेदे त्व्यपुनरुक्तौ राद्वद्वयप्रयोगो भेदाभेदयोः
कार्यकारणात्मना व्यवस्थापनस्यादित्याह तत्रेति। नन्वानेकान्तवादे इति भेदपक्षेऽनेकान्तवादश्च न भवती
त्यर्थः। न वेदपीति अनेकान्तत्वान्न भवेदपीत्यथेत्यर्थः। सत्यवादिनस्तस्करत्वेनारोपितस्य मोक्षवत्सत्यब्र
ह्मात्मत्ववेदिनो मोक्ष इति तस्करदृष्टान्तः। अहं ममाभिमानाभिमानयोरेकत्र व्याघातः स्यादिति प्रविकल्प्य
योजयति। शारीरादीनिति। ननु मिथ्यात्वे श्रवणादीनिति। ननु मिथ्यात्वे श्रवणादीनामविद्यानिवृत्तिसमर्थ
॥६॥ साक्षात्कारे हेतुत्वं न स्यादत आह सांव्यवहारिकं त्विति। असत्यादपि कोऽर्थे कार्यक्षमपदार्थोत्पत्तिमनन्तर ॥६॥
मेव वक्ष्याम इत्यर्थः। यद्यसत्यात्सत्यधीः स्यात्तर्हि धूमाभासादपि वह्निधीः समीचीना स्यादित्यत केमि
त्याशंक्याह न च धूम इति। धूममहिषी धूमी। सा च बाष्पः। असत्यादपि सत्यमुत्पद्यत इत्युच्यते न पुनरस
त्यात्सत्योत्पाद नियम इत्यर्थः। यदि पुनः कुतश्चिदसत्यात्सत्यं जातमिति सर्वस्मादसत्यात्सत्यजन्मापाद्य
ते तर्हि किं वित्सत्यं कस्य वित्सत्यस्य जनकमिति तत एव सर्वं सत्यं स्यादिति प्रतिवन्दीमाह नहीति। बोधस्या
स्यमुत्कापरिहारसाम्यमाह यतर इति। यतो नियमादित्यर्थः। ज्या वयोहानावित्यस्य निष्ठायां संप्रसारणे

नञ्समासे वाऽजीनमिति रूपं। अस्मादृश्यस्त्रुद्दीर्घाभावाद्यद्यपि ज्यानेर्वयोहानेरभावं सत्त्वमवगच्छंति वक्रानु
दृश्यत्वे माजिनमित्युच्चरिते ऽस्मादजीनमिति गृहीतादस्माच्छब्दात् वयोहानिप्रतीतिः स्ताभ्यां तिरजिनशब्दो
हि वर्मवचन इति। अत्र यथारोपितत्वाविशेषेपि किंचिद्वैधर्म्यं सत्त्वबोधकं किंचिदसत्त्वबोधकमेव बलवत्त्वं
ऽमस्माकमपीत्यर्थः। पायं पायं पीत्वा पीत्वा। तारत्वं वी व्याघ्रमर्षीं तनुमास्थाय रस्त्यन्वयः। व्यात्तं विवृतं विक
टाभ्यां वक्राभ्यां दंष्ट्राभ्यां करालं भयानकमाननं यस्याः सा तथोक्ता। उत्तब्धमुन्नमय्यधृतं बंधमदत्यर्थं य
ऽग्रमन्नमस्तकावच्चुंबितं लांगूलं यस्याः सा तथा। त्वत्स्वैरतस्ततो विक्षिप्ते लोचने यस्याः सा तथा अमित्रमभि
प्रतियोद्धुं गताऽप्यमित्रीणां स्फटिकशैलप्रतिबिंबितां ह्यमित्रमिति भ्रमाद्यात्मतनुं धावंतीसुघ्नो व्याघ्रतनु
मास्थितः यन्नपतीति। यदि स्वपन्दृशोऽवगतिरबाधिता स्यात्तत्त्वेवोपपद्यत इत्यर्थः। भेदाभेदव्यवहारौ भेदा
भेदोपपादकाविति वदन् प्रष्टव्यः किं ब्रह्मज्ञानात्प्राचीनौ तदुपपादकौ पराचीनौ वेति नाद्य रत्येकं नानात्वं
शौनकमर्करांडाश्रयइत्यादिना। तत्र च ज्ञानात् प्राग्भेदव्यवहारस्याप्रसक्तत्वान्न स उपन्यस्तः। द्वितीयमिदा
नीं शंकते पश्चादुक्तमिति। एकत्वज्ञानोत्तरकालमेकत्वव्यवहारोपि नास्ति नतरामनेकत्वव्यवहार इति परि
हरति यदि स्वप्नवदिति। ढुण्ढिः कदापि न तस्याः क्षीरमस्ति। स्मृत्याहिंसाऽपत्यानि पोषयति। अवगतिर्द्वैतिव्यक्तं

स्वरूपं। यथा खलु घटध्वंसो घटविरोधिकार्योदय एव नाभावः तस्य तुच्छत्वेन कार्यत्वायोगा देवमविद्यानिवृत्ति
रपि विरोधिविद्योत्पत्तिव्यक्तिरित्याह अविद्याविरोधिस्वभावतयेति। अविद्यानिवृत्तिर्यदि विद्यायाः स्वरूपं कथं स्य
तर्हि विद्याफलमत आह विद्यानिवृत्तिश्चेति। न वयं ज्ञानात्मरात्रीन व्यवहाराय द्वैतसत्यत्वं कल्पयामः
किंतु प्राचीनसिद्ध्यर्थमेवेति शंकते स्यादेतदिति। एकत्वनिबंधनो व्यवहारो माभूद्द्वैतसत्यत्वाक्षेपक इति
शेषः। पूर्वे नानात्वांशेन कर्मकांडाश्रय इति ग्रंथे प्रमाणसिद्धाद्वैद्व्यवहाराद्द्वैतसत्यत्वमाशंक्य निरस्तं
॥७॥ इदानीं सर्वलोकप्रसिद्धभेदसत्यत्वमाशंक्य देहाद्यभावव्यभिचारित्वेपि तदुपपत्तिमाहेति भेदः। कार्यकार ॥७॥
णादिकं भिन्नं तद्भावउपलब्धेरित्यापातसिद्धं हि सूत्रार्थे दोषं दृष्ट्वा व्याख्याति कारणस्य भाव इति। भाव इत्यस्य
व्याख्यानं सत्त्वेति। ननु कारणस्य भाव एव सूत्रे प्रतीयते कार्यस्योपलब्धिरेव तत्कथमुभयत्रेतरेतर
विशिष्टयोर्हेतुत्वमत आह तदिति। विषयपदं भावपदं भावोप्युपलब्धिविषय इति। तद्दंडिन्यायेन विषयपवि
षयिपरं एवं विषयिपदमुपलब्धिपदमप्युभयपरमित्यर्थः। उपादेयं कार्यं। सविशेषणहेतौ फलमाह तत्त्वा
वेति। उपलब्ध्याविरुपलब्धेरिति हेतूकारे प्रभासाक्षात्कारे साक्षात्कृतेन चाक्षुषेण व्यभिचारः स्यान्न हि घ
टादेः प्रभायाश्चान्येद्रष्टा निवृत्त्यर्थं भावेभावादिति विशेषणं। न हि प्रभाभाव एव घटो भवतीत्यर्थः। यदा

तद्भावानुरक्तधीबोध्यत्वं हेत्वर्थः स्वस्य। पि भाति घट इति प्रमानुरक्तधीगम्ये ऽनैकान्तः। तदिदमुक्तं प्रमानुरक्ता
नुविद्धेति। यदि भावेऽभावादिति हेतुस्तर्हि वह्निसत्त्वे भवति विशिष्टधूमेऽनैकान्तः स्यादुपलब्ध्यभावेऽनुपलब्धेरि
ति विशेषणे तु न भवेद्धूमस्य वह्न्युपलब्ध्यभावेऽनुपलब्धेरिति नियमाभावादित्याह नापीति। तद्भावानु
रक्तांहि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदाम इति भाष्यं। अत्र कारणस्य भावानुविद्धा कार्यबुद्धिर्हे
तुत्वेनोक्तेति न भ्रमितव्यं तत्रापि व्यभिचारस्योक्तत्वात् किंतु सूत्रगतोपलब्धेर्बुद्धिः कार्यकारणोभयविष का
यां तयोः कार्यकारणयोर्भावेन सत्त्वयोपरक्तां वा विशेषितां हेतुं वयं वदाम इति भाष्यार्थ इत्याह तदनेनेति। हेतु
विशेषणमुक्तं न हेत्वंतरपरत्वेन व्याख्यानमित्यर्थः। पटस्य तंतुव्यतिरेकेणानुपलब्धेः समवायस्य
भेदनिरोधापकत्वादन्यथासिद्धिरित्याशंक्याह न चेति। संबंधस्य भिन्नाश्रितत्वाद्भेदसिद्धौ समवायः स
मवायाद्व्यतिरेकानुपलब्धौ समाहितायां भेदसिद्धिरित्यन्योन्याश्रय इत्यर्थः। पटस्तंतुभ्यो भिद्यते प
तदुपलंभेऽपि कुविंदव्यापारात् प्रागनुपलब्धत्वात् कुंतवदित्यनुमानाद्भेदसिद्धेर्भेदसिद्धेर्नेतरेतराश्रयमि
त्याशंक्याह न चात्रेदमिति। अभेदवादिनस्तंतूपलंभे तदभिन्नपटोपलंभाद्धेत्वसिद्धिरित्यर्थः। कारण
सत्त्वे तत्त्वादिसत्त्वं स्यादित्याशंक्याह न चेति। उपपत्तिश्चात्र भवतीत्याहेति शेषः। उपपत्तिमेव दर्शयति

न्हीति। यथा मृदि घटो मृदात्मनाऽस्ति तथा सिकतायां तदात्मना न तैळमास्ति तदुपादानोपादेयत्वाभा
वकृतमित्यर्थः। ननु मृद्देव घटो मृदात्मनेः प्रागस्ति कथं तदात्मना घटस्य सत्त्वाऽत आह प्रत्युत्पन्नो
हीति। उत्पन्नस्य घटस्य मृदात्मत्वदर्शनान्मृदि सत्त्वां घटसत्त्वं युक्तमित्यर्थः। इत्थं तर्हि ते कार्य
कारणाभेदे प्रयुज्यते। घटत्वं मृन्निष्ठं। घटनिष्ठत्वात्तत्त्ववदिति। एवं जगद्ब्रह्मणोरभेदेऽप्यपि। शाखो ब्रह्म
वृत्तिः। आकाशवृत्तित्वात्तत्त्ववदिति। कार्यस्य कालत्रये सत्त्वं भाष्योक्तमयुक्तं तथासति कार्यत्वव्याघा
॥८॥ तादित्याशंक्यानिर्वाच्यरूपस्य कादाचित्कत्वेऽपि कार्यस्य तत्त्वमाधिष्ठानं तच्च नित्यमिति युक्तितः प्रतिपाद
यति यथा हि घट इति। कार्यस्य सत्त्वं स्वरूपं धर्मो वा आद्ये तस्य कदाचिदसत्त्वं स्याद्द्वितीये त्वेव सत्त्वासत्त्वयोर्ध ॥८॥
र्मयोः कार्यस्य धर्मिणोऽन्वयात्कादाचित्कत्वव्याहतिरित्याद्युपपादितमर्थं स्वादृष्टेन स्वरूपत्वादि
तिभाष्यव्याख्यावसर इत्यर्थः। कार्यस्य त्रिषु कालेषु सत्त्वे कारणस्यापि तथात्वात् द्वैसत्त्वे स्यातां तथा
त्वाभेदासिद्धिरित्यत आह। त्रिष्वायानापि ततः शंकते सत्त्वं चेदिति। त्रिष्वपि कालेषु कार्यस्य सत्त्वं चेदित्यर्थः।
कार्यकारणयोः स्वरूपसत्त्वं चैकमित्यर्थः। यदि कार्यकारणयोरेकसत्त्वाभेदादभिन्नत्वं तर्हि तस्यापि
द्वाभ्यामभेदाद्द्वैतापत्तिरित्याशंक्याह न चैताभ्यामिति। न हि वयं सत्त्वेन कार्यकारणयोः साक्षादभेदं ब्रूमः

किंतु तत्र तयोरारोपितत्वे न तद्व्यतिरेकेणाभावं। यदि मन्येत सत्त्वमेव कार्यकारणयोरारोपितमस्त्विति तत्राह य
द्यास्तितिहीति। स्वीकृतस्यैव प्रसंजैजनमयुक्तिं तां दर्शयितुं तामेव पक्षविभागपूर्वकमाह नत्रेति। भेदः कार्यकारणव्व
कृणः सत्त्वमभेदः। अस्माद्यं भिन्न इत्यत्र पंचम्युल्लिखितावध्यग्रहो धर्मिणः सकाशाद्गृहीतभेदस्य न संभव
ति भेदग्रहश्च नागृहीते प्रतियोगित्व उपपद्यते धर्मिणोपि स्वापेक्षया तत्प्रसंगाद्दतश्चान्योन्याश्रयग्रस्तभेद एवा
रोपितोपितो ना भेद इत्याह वयं त्विति। यस्त्वयमन्योन्याश्रयस्य केन विदुद्धारः कृतः प्रतियोगित्वेनाप्रतीतावप्यधिक
रणाप्रतीतिरधिकरणत्वेनाप्रतीतौ प्रतियोगिप्रतीतिश्च भेदग्रहणकारणं। न भेदे न गृहीतत्वं एकं त्वन्योन्याभा
वाख्यभेदं प्रतिरक्तं भकुंभयोरधिकरणत्वं प्रतियोगित्वं वा स्वस्य तःस्वस्मादपि स्वस्य भेदग्रहवारणाय प्रतियोगित्वे
नैतत्त्वादिविशेषणं स्वं भावद्भिन्नः कुंभस्त्वत्र हि स्तंभः प्रतियोगित्वेन प्रतीयते नाधिकरणत्वेन न प्रतियोगितया
कुंभाद्भिन्नः स्तंभ इति प्रतीत्यंतरेनुतमेव भेदं प्रति कुंभः प्रतियोगित्वेन भाति स्तंभश्च धर्मितया न तश्चोक्तविधव
८ स्तुप्रतीतिर्भेदग्रहहेतुरिति केनेतरेतराश्रयमिति सोऽसाधुः भेदाधिकरणत्वेन भेदप्रतियोगित्वेन च प्रतीतेरपे
क्षायामन्योन्याश्रयाद् निस्तारसद्यस्य कस्यचिदधिकरणत्वेन प्रतियोगित्वेन च प्रतीत्यपेक्षायां स तदाधिकरणत्वे
न पुरोदेशादन्यदेशागतसंसर्गाभावं प्रतियोगित्वेन च स्फुरतोः शुक्तीदमंशरजतयोर्भेदग्रहप्रसंगेन भ्रमा
नुदयप्रसंगाद्दुरुक्तं तेन भेदाधिकरणस्य तत्प्रतियोगिनश्च स्वरूपेण प्रतीत्यपेक्षाप्यनेनैवापास्ता। स्वरूपेण

कंध्व २

गृहीतयोः शुक्तीदमंशरजतयोर्विरक्तवृत्तेन तथाभूतयोर्भेदग्रहप्रसंगाद्द्वयोः स्वरूपं भेद इति वा तत्स्वापरस्तं। अत्र धा
रणं स्वरूपं भेदरूपं विना असाधारणत्वस्य भेदग्रहाधीनग्रहत्वेन भेदान्तरापेक्षायां स्वरूपभेदाभ्युपगमके भंगादि
ति दिक्। भेदे नोपजीव्यत्वाच्चाभेदो नाध्यकार स्याह एकैकेति। वीप्सया प्रति भेदानुवादः। अत एवैकाभाव इत्युक्तं।
व्याकृतं नामरूपत्वादिति भाष्ये व्यक्तव्यक्तिस्वीकृतेः सांख्यवादापातं इत्याशंक्याह व्याकृतत्वेति। नान्या सतीति
भाष्ये असतीति च्छेदः। कार्यरूपेण च सत्त्वं शक्तेरापाद्यते तथा सतीति हि कार्यस्यासत्त्वप्रतिक्षेपः सिध्यतीति मन्वान आ
॥५॥ ह नाप्यसतीति। भाव्यादेतिद्वितीयपाठव्याख्यायां कारणाविरेकेण कार्यानुपलंभस्योक्तत्वात्पुनरुक्तिमाशंक्याह
यद्यपीति स्वपरनिर्वाहकत्वात्समवायः संबंधान्तरानपेक्षस्संयोगोपि नापेक्षते तु प्रतिबंदीमाशस्संयोगस्य कार्य
त्वरूपविशेषादयुक्तेत्याशंक्य नित्ये आत्माकाशसंयोगे तस्यासिद्धिमाहाजेति। अजसंयोगमनिच्छन्तं प्रति सर्वत्रासि ॥५॥
द्धिमाहापिचेति। अस्त्वसंयोगवन्नित्यत्वाभावापसमवायोप्यनित्यस्तथापि नानवस्था समवायस्य समवायिकारणा
नभ्युपगमेन निमित्तकारणमात्रात्तदुत्पत्तेः समवायान्तराप्रसंगादित्याशंक्याह तथा सतीति। ततः संयोगस्य समवा
यिकरणमिच्छता समवायस्यापि तदेष्टव्यमित्यनवस्था तदवस्थैवेत्यर्थः। नानात्वेन सहेतुकत्वाश्रयोपयस्यस्य सं
वंधस्तथोक्तः। उत्पत्तिकर्तुः कार्यस्य प्रागुत्पत्तेर्नासत्त्वमित्युक्तं तत्रोत्पत्तेर्न कार्यकर्तृ किंतु कारणमिति शंकतेय
द्युच्यतेति। यद्यप्युत्पद्यते घट इति कार्यस्य कर्तृत्वं भाति तथापि गौण्या वृत्त्या कारणस्यैतत्। न च सिद्धेषु कपालेषु जा

यत इति पूर्वापरकालव्यासक्तासंयोगानुपपत्तिः। कार्योत्पादनायाः व्यासक्तत्वादित्यर्थः। कपालस्य कर्तृका घटविषयोत्पाद
नानोत्पत्तिः सा तु घटकर्तृकेति परिहरति उत्पादनाहीत्यादिना। यद्युत्पत्तिरुत्पादनैव तर्हि उत्पादनायामिवोत्पत्तावपि
सकर्मकत्वाद्घटस्य कर्मत्वं व्यपदिश्येत न चैवमस्तीत्यर्थः। मृत्पिण्डो हि घटं करोतीति स्वामी तु कारयति तत्र यथा करोतिका
रयत्योराश्रयभेद एवमत्रापीत्यर्थः। धात्वर्थोपात्तव्यापारः कर्तेति कर्तृलक्षणयोर्वेत्यर्थः। भिन्नमिवेति सामानाधिकरण्ये
नहि भिन्नमिवाभिन्नमिव वक्तव्यमस्तीति। अनर्थैवेति। इतरथा हि धीसांख्यवादः स्यादिति। नाप्यगतमूलकारणशब्दे
न ब्रह्मणोन्यः कश्चिन्मायाप्रतिबिम्बितो नाभिधीयते तथा सति तस्य परिच्छिन्नत्वादधिकरणोपक्रमोक्तस्य कारणविज्ञा
नात्सर्वविज्ञानस्यासंभवप्रसंगात् किं तु सर्वाधिष्ठानमित्याह मूलकारणमिति। अज्ञातं नटवद्ब्रह्मकारणं शंकरो
ब्रवीत्। जीवाज्ञातं जगद्बीजं जगौ वाचस्पतिस्तथा। कार्यमुपादानाद्भिन्नं तदुपलब्धावप्यनुपलब्धत्वात्ततोधिक
परिमाणत्वाच्च संमतवदित्यनुमानयोर्व्यभिचारार्थं पटवच्चेति सूत्रं। तस्यामेव प्रतिज्ञायां भिन्नकार्यकरत्वस्य व्यभि
चारार्थं यथा च प्राणादीति॥ इतिरक्तिः। जीवाभिन्नं ब्रह्म जगदुपादानं वदत्समन्वयो यदि तादृग्ब्रह्म जगज्जनयेत
र्हि स्वानिष्टं नरकादेरिति न्यायेन विरुध्यते न वेति संदेहे पूर्वत्र कार्यकारणानन्यत्ववद्घटाकाशः कश्चिज्जीवानाम
पि महाकाशोपमब्रह्मैक्यमुक्तं तस्य हिताकरणाद्यनुपपत्तिरित्याक्षेपात्संगतिः। ननु सोऽन्वेष्टव्य इत्यादिश्रुतेर्निर्दिश
त्वमर्थं पूर्वपक्षस्तत्राह यद्यपीति। यदि भेदाभेदावेकत्र विरुद्धौ तर्हि भेद एव भेदेन बाध्यतामत आह न च भेदेरिति॥

इत्थं क्रमनंतशक्तिकरणत्वमर्थः। ननु स्वाभाविकं ब्रह्मैकत्वं जीवा अविद्योपहितास्तेषां नानात्वमिति तेनोपहितस्य
मात्स्करणमुपपन्नमत आह तेनेति। तद्द्रष्टिमानद्विति पश्यतीत्यन्वयः यद्यपि परमात्मनो दर्शनक्रियाश्रयत्व
मनुपपन्नं तथापि स्वरूपप्रकाश एव तत्र द्विषयेणोपरक्तस्तं यथास्थितं भासयत्यतः पश्यतीति निर्दिश्यते।
उपसंहारात्॥ ब्रह्मणोपादानमसहायत्वात्सम्मतवादिति न्यायेन समन्वयस्य विरोधसंदेहे पूर्वत्रौपाधिकजीवब्र
ह्मभेदाद्धिताकरणादिदोषः परिहृतः इह तूपाधितोपि विक्रमथिष्ठात्रादि नास्तीति पूर्वपक्षमाह। ब्रह्म स्वै
खाद्विविक्षा। त्यादिना। एकस्मिन्नुपादाने भेदवारणं। अद्वितीयतयेति सहकारिनिषेधः। एकत्वप्रयुक्तं दूषणमाह
॥१०॥ नत्वेकरूपादिति। कारणवैजात्ये हि कार्यवैजात्यमित्यर्थः। न केवलं कार्यवैजात्यायोग एकजातीयकार्या ॥१०॥
णामपि क्रमायोग इत्याह न चाक्रमादिति। समर्थमपि सहकार्यपेक्षं सक्रमेण कुर्यादित्याशंकामपनयन्नद्विती
यत्वप्रयुक्तामनुपपत्तिमाह। द्वितीयतयावेति। भाष्यस्थकारकसाधनपदयोरपौनरुक्त्यमाह कैकमिति समग्राणांका
वः सामग्र्या कथं तस्य साधनशब्दाभिधेयत्वमत आह तथा हीति। साधयत्येवेति साधनमित्यर्थः। प्रकृतौ करणं
निष्पादनं। असंतव्यतिरिक्तत्वं। स्वधर्मत्वेनानंतर्भूतत्वं। एकस्मिन्काले उषित्वा तं परित्यज्य कालांतरेपि वासः
परिवासः। पर्युषितमिति प्रयोगदर्शनात्। आंतरत्वं स्वधर्मत्वं। मायिनं मायाविषयं। अज्ञातत्वस्य वस्तुधर्मत्वा
त्तद्वारेण मायायास्य अज्ञानमपि धर्म इत्यांतरत्वं। ननु मायायामप्यक्रमत्वात्कथमक्रमात्कारणात्कार्यक्रम

णेति। तस्या मायायाः परिपाकस्तात्तत्कार्यसर्गप्रतिपोषकत्वं तस्य क्रमोऽपि कार्यक्रमान्यथानुपपत्त्या कल्प्यत इत्यर्थः।
पूर्वमविद्यास्याविव्याद्सहायत्वमसिद्धमित्युक्तमिदानीमंगीकृत्यापि तदनैकान्तिकत्वमाह कस्मादपीति। शरीरे
उत्पन्नं हि कर्म पूर्वाकाशप्रदेशविभागमुत्तरप्रदेशसंयोगं शरीरे च वेगाख्यसंस्कारं जनयतीत्यनैकान्तिकमसत्
हायत्वं नानाकार्यानुत्पादकत्व इत्यर्थः। असहायस्योपादानत्वं क्षीरवदुपपाद्यासहायस्याधिष्ठातृत्वसमर्थ
कं सूत्रमवतारयति। यद्वित्विति। कृत्स्नप्रसक्तिर्वा। सावयवस्यैव नानाकार्योपादानत्वमिति न्यायेन समन्वयस्य विरोध
संदेहे पूर्वाधिकरणोक्तक्षीरदृष्टान्तात्परिणामित्वभ्रमे तन्निरासात्संगतिः। स्यादुक्षीरेति। तस्मादविकृतं ब्रह्मेति ज्ञा
व्यं न दृश्नीति तत्त्वत इति चपदाध्याहारेण व्याचष्टे तस्मादिति। इतरथा हि मायामयविकारनिषेधे जगत्सर्गो न
स्याद्दृश्नीत्यनुक्तौ च साकाक्षत्वं स्यादिति। निरवयवेऽपि अघणिविविचित्रशक्तिवशेनाकृत्स्नप्रसक्तेरुक्तत्वाद्बोध्या
नुपपत्तिमाशंक्य शक्तीनामवास्तवत्वकथनार्थत्वेन परिहरति अविद्येति। अवस्तुत्वात्समुदायो न परिणमते।
समुदायिष्वपि पादैः सत्त्वमात्रं परिणमेत न तु रजस्तमसी ततो मूर्च्छद्दोन स्यान्न चैतद्दृष्टीत्याह यद्यपि समु
दाय इति। द्व्यणुकमारब्धुमणुना संयुज्यमानोऽणुरूपर्यधः पार्श्वतश्चतसृषु दिक्षु कदाचित्केनचित्संयुज्यते। ते
च सर्वतो न समानदेशा इति व्याप्तिमानुपपत्ते द्व्यणुकपिंडः परमाणुमात्रः प्रसज्येतेत्यर्थः। अव्याप्यवृत्तौ संयोगस्य
तावन्नैकत्र भावाविस्फक्तौ। अथ प्रदेशभेदेन भावाभावौ तत्राह व्यापनेवेति। कार्यकारणभावआरम्भः। सर्वेपिताव

मायाशक्तिमद्ब्रह्मणो जगत्सर्गवदतः समन्वयस्य शारीरस्य न मायेति। न्याये न विरोधसंदेहे संगतिमाह विवि
त्रेति। अंतर्याम्यधिकरणे त्वविद्योपार्जितत्वं संबंधे जगद्ब्रह्मणोः सिद्धे शारीरशहितस्यापि नियंतृत्वसंभव उक्तं
इह त्वशारीरस्याविद्यैवाक्षिप्यत इति भेदः। तदुक्तमिस्मितदृष्टवादिवदपीति सूत्रोक्तिपरत्वेन व्याचष्टे यथावादिनि।
शक्तिमंतो देवादयो यद्यपि शारीरिणस्तथापि बाह्यसाधनानपेक्षाः। यदि तु तत्र दृष्टं शारीरित्वं शक्तिमत्वेन ब्र
ह्मण्यापाद्यते तर्हि कर्तृत्वेन कुलालादिषु दृष्टं बाह्यसाधनापेक्षत्वं देवादिष्वप्यापाद्येतेति प्रतिबंद्याप्रमेयसंभा
वनोक्तास्वरूपमाणमिति प्रमाणमुक्तं। न प्रयोजनवत्वात्। परितृप्तस्य ब्रह्मणो जगत्सर्गवादि समन्वयस्य ब्रह्मन विना
प्रयोजनाभिसंध्यभावादकर्तृत्वमिति पूर्वपक्षमाह न तावदित्यादिना। तादर्थ्येन सुखार्थत्वे न प्रवृत्तो प्रवृत्तेः प्राक्
११॥ सुखाभावे स तिकृतार्थत्वानुपपत्तेरित्यर्थः। अविद्योपहितजीवात्मकरेण पिधायानुग्रात्या भाव उक्तः। न दृष्ट ११॥
प्रयोजनोद्देशलक्षणो हेतुरस्तार इत्यदृष्टहेतुका। औत्पत्तिकी पुरुषस्यो सत्तिमारभ्य प्रवृत्ता। अदृष्टहेतुकत्वस्य
विवरणं प्रयोजनानुसंधानमंतरेणेत्येतत्। स्वासादौ प्रयोजनाभिसंबंधिरूपसाध्याभाववद्धेतोरभिचेतन
कर्तृकत्वस्याभावान्न व्यभिचार इत्याशंक्याह न वास्यामीति। जाग्रदादौ चेतनस्य ज्ञानतोपि चेतन्यमस्यास्वासा
दिप्रवृत्तावनुपयोगि सुषुप्तेपि तस्याभावादिति वनमुक्तं कुतः प्राज्ञस्य सुषुप्तस्यापि स्वरूपचैतन्यात्प्रवृत्तिरित्यर्थः।
यदुक्तं लीलावत्तर्हि व्यभिचारमित्यर्थः यागापि सुखप्रयोजनत्वादिति तत्राह सत्यपीति। अनुद्दिश्यप्रयोजनं

नकरोतीति साध्येत्वप्रांतत्वेनत्वं लीलाकर्तरि सव्यभिचारमित्यर्थः। ननु यद्बुद्ध्यायत्तसाध्यं तत्प्रयोजनाभिसंधिपूर्वकमिति
व्याप्तिरभिमता तथा च न लीलादौ व्यभिचार इत्यत आह दृष्टं चेति। यद्यप्यस्मदपेक्षया जगद्बुद्ध्यायत्तसाध्यं भाति तथा
पि न ब्रह्मापेक्षयेति न प्रयोजनाभिसंध्यापात इत्यर्थः। नगैः पर्वतैः तैर्हनुमत्प्रभृतिभिः कपिभिर्नरैर्बहुतरत्वे तन्नाही
स्तन्वयः। एतच्छक्यत्वे निदर्शनं। एवं नीराणां निधिः समुद्रः शिलीमुखैः शरैर्नैकत्र्यम् नबद्धः नचामनीरनिधिर्न
पीतः। तीर्थवत्करत्वे निदर्शनं। आचार्य्ययोर्महीपतिर्महीं चकार तस्य नाम नृगर इति। निपतमित्तमनपेक्षया यदा क
दाचित्स्वकृत्स्नदृयोयदृच्छास्य भावस्कस्त्वर्या वद्वस्कभावी यथा श्वासादौ। यदुक्तं न तावदुन्मत्तस्येवमिति विभ्रमा
नुगतक्रियेति तत्र मा भूदुन्मत्तं ब्रह्म भवतु जीवाविद्याविषयीकृतं जगद्विवर्ताधिष्ठानं तथा च न प्रयोजनपर्यनुयो
गः सृष्टौ। विन्दा हापि च नियमिति। प्रतिविंबगताः परस्मन्नतुयक्रादिविक्रियाः। पुमान् कीदृग्यथा ब्रह्म तथा जीव
स्थविक्रियाः। एवं वा चस्मते लीला लीला सूत्रीयसंगतिः। अस्वतंत्रतत्त्वः कूटस्थप्रतिबिंबेशवादिनां। विभ्रमापां
प्रयोजनानपेक्षामात्रं कथमाह नचेति। नन्वविद्याया हेतुत्वे कथं ब्रह्मकारणत्वमत आह सा चेति। छुरिता मिश्रिता। नि
र्विषम इति वेदांतप्रतिपाद्यो विषमोस्य दूषत्वेन नवर्तनइनितयोक्तः। वैषम्येति। यो विषमसृष्टिकारी स सावद्यो ब्रह्म च
विषमं सृजतीति न्यायेन समन्वयस्य विरोधसंदेहे पूर्वत्र लीलया स्रष्टृत्वमुक्तमिदानीं सेव न सापेक्षस्य तज
वत्यनीश्वरत्वप्रसंगान्निरपेक्षत्वे च रागादिमत्त्वमित्याक्षिप्यते। अनुमानस्य व्यभिचारं न हि सम्भवति। सापेक्ष

कल्म

त्वेऽनीश्वरत्वप्रसंगमाशंक्य व्यभिचारमाह नहि सेवेति। कर्मापेक्षत्वेन वैषम्यं परिहृतं। नहि विषमकर्माणि प्रेरक
त्वेन वैषम्यता दृवस्थ्यमित्याशंक्याह न वैषद इति वैषम्यादिप्रसंगान्नेश्वरः कारणमिति न च वाच्यं व्यपाय दीश्वरो वि
षयं सृजेन्न हि रागादिमत्त्वमाऽनीश्वरः स्याद्दीश्वरश्चायं तस्मात्तविषमं सृजतीति किमनुमीयते उतेश्वरो राग।
दिमान्विषमस्रष्टृत्वादिति वैषम्यं। नाद्यो विरोधादित्युक्तं। तमेवागमविरोधं दर्शयति यस्मादिति द्वितीयं निषे
धति न चेति। यद्येवं वैषम्यमनुमितं किमतो निरवद्यत्वस्यापेक्षितसिद्धत्वेनातीतकालत्वात्ताद्‌दृवस्थ्यादिरर्थः। तदेव
दर्शयति तस्मादिति। श्रुतीनां ग्रावप्लवनादिश्रुतिभ्यो वैषम्यार्थमर्थे संभावनां दर्शयति तज्जातीयेति। उन्निनीषते क
॥१५॥ र्ध्वं नेतुमिच्छति। ईश्वरः पर्जन्यवत्सृष्टिमात्रे कारणं वैषम्ये तु बीजवत्तत्स्वाणि कर्मवासने इति नेश्वरस्यासा ॥१५॥
वद्यत्वमित्यर्थः। अपि च मायायामपीसृष्टिरस्माकं पक्षे चेत्तत्राविद्यासृष्टिकर्तृत्वे न रागादिमत्त्वमनुमीयते तर्हि नैकां
तिकमित्याहाभ्युपेत्य चेति। अकृताभ्यागमप्रसंगव्याकारोत्यकृतर इति। तदंगीकारे दोषमाह तथा चेति। वेदांतान
र्थक्यं मुक्तानामपीति भाष्योक्तमित्याह मोक्षशास्त्रस्य चेति। भाष्ये केवलाविद्यायाः वैषम्यकरत्वनिषेधोऽनुपपन्नः
भ्रातं विचित्रत्वेन वैषम्यहेतुत्वोपपत्तेरित्याशंक्याह ख्येति। न नुमा भूद्व्यवस्थालक्षणाऽविद्या वैषम्यकरीश्व
प्रसंस्कारस्तु किं न स्यादिति चेत्तत्राह स तु संसारानादितामंतरेण न स्यात्तथापि सिद्धं नः समीहितमित्याह विद्ये
पेति। विभ्रमसंस्कारस्य क्रमसापेक्षत्वान्न स्यात्तत एव वैषम्यहेतुत्वं किं भ्रमस्य न केवलं ख्यो वैषम्यहेतुरपि तु तुरगा

हीनत्वेनपित्वात्तत्सहितः स्तथा च विभ्रमो रागादिसहितः शरीराच्छरीरं कर्मणः कर्मरागद्वेषाभ्यां तौ च मोहः संस्काराद्विभ्र
मात् स च शरीराद्युदेतीति चक्रभ्रमणमनादि तैर्वसमादध्यातीत्यर्थः। अवघातनिष्पन्नांस्तुषान् पुरोडाशकपाले
नोपवपतीत्यत्रावघातसमये कपालेषु पुरोडाश। कपाले नोऽर्पणाभावात् आविष्यक्तुपणमपि ह्य कपालानां पु
रोडाशसंबंधकीर्तनमिति। सर्वधर्मोपपत्तेश्च॥ निर्गुणब्रह्मणो जगदुपादानत्वादिसमन्वयस्य यन्निर्गुणं नेनदु
पादानं गथरवेति न्यायविरोधि सदेहे भवतु विषमस्वहृत्वं प्रपाते ऽनेकांतं न तु सगुणत्वमुपादानत्वे रति प्रा
स्ते विवर्ताधिष्ठानत्वमपि ह्युपादानत्वं तच्च निर्गुणेऽप्यविरुद्धं। आत्माद्यावनित्यत्वाद्यारोपोपपत्तेरिति सिद्धांतः।
त्वाप्यकारेणासौत्री सर्वधर्मोपपत्तिं व्याकुर्वता सर्वज्ञत्वादयः कारणधर्मा ब्रह्मण्युपपद्यंते इत्यक्तेन दयुक्त
मिवनत्वेनैकोकेकस्य सर्वविकारणस्य धर्मादृश्यंते ऽत आहात्रेति। जउप्रेरकत्व कुख्याख्या दोहद्वं। ब्रह्मण्य
पि नियंतारि तेन भाव्यं तस्य सर्वप्रेरकत्वस्य श्रुतिसिद्धत्वादर्थात्सर्वज्ञत्वसिद्धिरेवं सर्वशक्तित्वादौ योज्यं।
सर्वशक्तित्वेनोपादानकारणत्वमुपपादितं। सर्वज्ञत्वेन निमित्तकारणत्वं चेत्युपपादितमित्यर्थः। महामाया
विषयीकृतत्वेन निर्गुणत्वादिप्रयुक्तस्य वानुपपत्तिशंकापास्तेत्यर्थः॥
इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदनुभवानंदपूज्यपादशिष्ये भगवदमलानंदविरचिते वेदांत
कल्पतरौ द्वितीयाध्यायस्य प्रथमः पादः समाप्तः॥

पत्र
२

ठद्दंठैर्वीठुद्दंठैः पृथुतरपरिघप्रांशुभिर्भग्नमात्रं केचित्केचिच्च वज्रप्रतिमनखमुखैर्दीर्णदेहोपदेहाः। आकर्ण्यै
केवयस्य प्रलयघनघनध्वानगंभीरनादं विध्वस्तादैत्यमुख्याः क्रमहृमतिबलं श्रीनृसिंहं प्रपद्ये॥
स्वबोधमहिताबोधतद्भूतजगद्भ्रमं। सदानंदघनाद्वैतं परं ब्रह्मास्मि निर्भयं॥ छ॥ ॐ वेदैश्चैव नानुपपत्ते
श्चनानुमानं। स्वतंत्रार्हत्यस्यप्याख्यानं वेद निरपेक्षा इति। विलक्षणत्वादयो हि प्रधानादिपरत्वेन वेदांत
व्याख्यायामनुग्राहिकार मास्कं युक्तयः स्यातं श्रेण प्रधानादिसाधिकाः इत्यनेनाक्षेपावसर एव नादाम्यौ
॥१३॥ विवेचितः। मोक्षमाणानां मोक्षमिच्छतां मुवेः सन्नंतस्य रूपं वेदांतैरेव ज्ञानजननात्किंपरप
क्षाक्षेपेणात्राह यथा चेति। ननु प्रमाणावगतान्युपादानानि जगति समुच्चीयंतां। तंतवः पटे उत आहन ॥१३॥
न्वाक्षेपेणातत्राह यथा चेति। चेतनमुपादानमस्येति तथोक्तं। वेदो हि ब्रह्मप्रणीतरतिसां ख्याद्यागमस्य तनुक्तता तथा च कपि
लादेवेति। चेतनमुपादानमस्येति तथोक्तं। वेदो हि ब्रह्मप्रणीत इति सांख्याद्यागमस्य तु ... कपिलाद्यागमं दृष्ट्वा कृतमनुमानमाप्ननषा
द्याग मो वेदेन न बाध्यते सिंहरवसमबलसिंहांतरेण एकं कपिलाद्यागमं दृष्ट्वा कृतमनुमानमाप्नेन षा
ध्यते। तथा सिंहं दृष्ट्वा कृते दावादिमयेप्रतिप्रेतिकृतिसिंहे दृश्यमानार्दृशः सिंहरतिसिंहाकारप्रतीतेरबा
धरस्पर्शः। चेतनप्रकृतिकं जगदिति प्रतिपादयतो वेदस्य प्रतिरोधकमनुमानमाह। यानिहीति। संयोगासेऽप्य
। भिचार वारणार्थमास्थोल्यादित्यक्तं संयोगादयो हि न स्थूलपिंडादारभ्य कपर्यंतमनुयंति कुंभोपादान
त्वं सत्वादिगुणाश्रितं। मृद्धतत्वात्सतावदितिव क्रीत्यानुमानं। ननु सुखं घटरसाद्यनुपलंभात्कथं

तद्रूपत्वेनानुगतिरत आह। उपलभ्यत इति। घटविषया हि बुद्धिस्तमनुकूलं प्रतिकूलं वा गोचरयतीत्यस्ये
वानुगतिरित्यर्थः। अन्वितत्वादेव सुखदुःखमोहात्मकं सामान्यं। सुखाद्याधारत्वेपि जगतः कथं सत्वाद्या
त्मकप्रधानोपादानत्वमत आह तत्रेति। या जगत्कारणस्य कार्यवशोन्नीता सुखात्मता सा सत्वमित्यर्थः। वि
धेयापेक्षया नपुंसकप्रयोगः। उपलभ्यत इति यदुक्तं तद्व्याकरोति तथा हीति। निरंतरं तत्स्वभावस्यैव वेद
नेकांतवारणाय यत्रत्येकमित्युक्तं। ननु चेतनोपकारकत्वेन तत्प्रति गुणभूतत्रयस्य कथं प्रधानत्वमत आह। तद्गु
विगुणमिति। गुणभूतस्यापि गुणत्रयस्य सिद्धांतसिद्धं मायावैलक्षण्यमाह। न तु केनेति। करणमिंद्रियं
केन विज्ञातेनेमनकार्यते न प्रेर्यते। किंतु करणानां प्रवृत्तौ चेतनागतावस्थो भोगापवर्गरूपः पुरुषार्थ एव हेतुः स
चन्यान्यो गुणानामपि तुल्यरूपस्यर्थः। नन्वनुमानादचेतनोपादानकत्वे जगतः सिद्धे जगदुपादानस्य चेतनाधिष्ठि
तत्वापक्षा किं दूषणमुक्तं भवति। साध्यसिद्धिमंगीकृत्य दृष्टांतदृष्टधर्मांतरसंचारे स्युत्कर्षसमा जातिः स्या
द्यथा कृतकत्वेन घटवद्ध्वनित्यः शब्दस्तर्हि तद्वदेव मूर्तः स्यादिति। तत्राह। यादितावदिति अयमत्र दूषणा
भिप्रायः। किं गुणत्रयं चेतनानाधिष्ठितमुपादानमिति साध्यं तदुत तस्योपादानत्वमात्रं आद्ये विरुद्धत्वं। द्वितीये
सिद्धसाध्यं न त्रिगुणमायाया ईश्वराधिष्ठितायाः प्रकृतित्वेष्टेरिति मूर्तत्वापादनादेव समाह व्याघेरिति। कृ
तकत्वं हि न मूर्तत्वेन व्याप्तमित्यर्थः। उपाददत इति उत्पादयंति। कृतकत्वमिव विरुद्धमित्यन्वयः। दूषणाद्यो

यथा शब्दैः समानार्थ उपमामात्रपरो न तूपमीयमानपर एवंशब्दस्य पृथक्प्रयोगात्। यदि सत्त्वाद्यन्वि-
तत्वाद्युमत्त्वप्रकृतिकं मृदन्विन कुंभवन्न हि तच्चेतनाधिष्ठितं तत्प्रकृतिकं स्यात्तत एवं तद्द्वेत्युक्तं। नत्रो-
पाधिमिव शंकनीय इत्युच्यतेति। यथैकस्मिन्साध्ये साधनद्वयसन्निपाते सत्येकतरसाधनप्रयुक्ता व्याप्तिरितर-
त्रारोप्यत इति सोपाधिकता। यथा निषिद्धत्वप्रयुक्ता व्याप्तिर्धर्मसाधनत्वस्य हिंसात्वे समारोप्यते। एवमेक-
स्मिन्साधने समन्वयाद्यौ प्रकृतिगताचेतनत्वचेतनाधिष्ठितत्वरूपसाध्यद्वयवत्त्वं तत्रांतरंगाचेतनत्वप्रयु-
क्ता हेतुसाध्ययोर्व्याप्तिर्बहिरंगचेतनाधिष्ठितत्वे समारोप्यत इति भवति साध्यमपि सोपाधिकमित्यर्थः। कश्चिद्धू-
मोऽन्तरंगत्वाद्धि [illegible] । नांतरंगत्वबहिरंगत्वकृते व्यापकत्वाव्यापकत्वे किंत्वव्यभिचारव्यभिचारकृते
॥१४५॥ अंतरंगस्यापि महानसादिस्वरूपस्य व्यभिचाराद्धूमवत्त्वप्रत्यव्यापकत्वाद्बहिरंगस्यापि वह्निसंबंधस्याव्य- ॥१४५॥
भिचारेण व्यापकत्वादित्यभिप्रेत्य परिहरति। स्वभावेति। स्वभावप्रतिबद्धमनौपाधिकत्वेन संबद्धं। ननु
स्वभावसंबंधोऽयं तरंगत्वान्नतु लेपस्तत्राह स्वेति। साधनाव्यापकः साध्यव्यापक उपाधिः। यथा प्रपंचः सत्यः
प्रतिभाससमानत्वाद्ब्रह्मवदित्यत्र चेतनत्वमुपाधिः। अयं हि साध्यव्यापकः। सत्यब्रह्मव्यापनात्। न च सा-
धनव्यापकः। पक्षे साधनवत्यप्रवृत्तेः। साध्यव्यापकत्वे केरौच्छेऽनच्छस्यानुमायामिंधनवत्त्वस्याप्युपा-
पाधितास्यात्तद्वारणाय साधनाव्यापकत्वोक्तं। तावत्युक्ते कार्षवह्निमत्वादेरप्युपाधित्वं भवेतत्स्मा

न्ह्र इति साध्यव्यापकत्वस्य सिद्धिरिति। नन्वेवं पक्षेतरत्वस्याप्युपाधिता स्यात् तद्व्याप्तस्यार्थं साध्यसमव्याप्तिरिति वि
शेषणीयमिति। तन्न यतः साध्याभावेन साकं स्वाभावव्याप्तेरनिश्चयात्। कुतः पक्षेतरत्वस्य साध्यव्यापकता
मिति। यदि हि यत्र पक्षान्यत्वं नास्ति नास्ति तत्र साध्यमिति व्यतिरेकव्याप्तिरवधार्येत अवधार्येत तदा यत्र साध्यं त
त्र पक्षान्यत्वमित्यन्वयः। इतरथा पक्षेतरत्वं यत्क्वापि साध्यसत्त्वे कुतस्तस्य तद्व्यापकता। न चावधारयितुं श
क्यते यत्र पक्षान्यत्वं नास्ति पक्षे तत्र साध्याभावस्य संदिग्धत्वात्। एवं च साध्यव्यापकत्वे नैव पक्षेतरत्वव्यावृत्तेः स
मपदं दुष्येति। द्विधा चोपाधिः शंकितो निश्चितश्चेति तत्र शंकितो ऽनुकूलतर्काभावादिना गम्यते। निश्चितस्तु यथा
योगप्रमाणेरवधार्यते। सदनुमाने तु समारोपित उपाधिः साधनव्याप्त्यादिभिरुद्ध्रियते। शंकितस्त्वनुकूलत
र्कैः शंक्यमानश्च साध्यव्यापकः साधनाव्यापकश्च वा स्यात्तत्र साध्यव्यापकत्वे साधनव्यापकत्वं स्यात् व्यापकं
प्रति व्यापकस्य व्याप्यं प्रति व्यापकताया अवश्यंभावात्। साधनाव्यापकत्वे च साध्याव्यापकत्वं भवेत्। व्याप्यं प्र
त्यव्यापकस्य तद्व्यापकं प्रत्यव्यापकत्वनियमादिति निश्चततदुद्धार इति। नन्वेवमुपाधिसिद्धौ निरुपाधिकसं
बंधरूपव्याप्तिसिद्धिस्तत्सिद्धौ च साधनाव्यापकत्वादिरूपलक्षणसिद्धिः सिद्धे तल्लक्षणउपाधिसिद्धिरिति
चक्रकं कस्मात्। नेति नवीनाः साध्यवन्निष्ठात्यंताभावाप्रतियोगित्वरूपत्वात्साध्यव्यापकत्वस्य। साधनवन्नि
ष्ठात्यंताभावप्रतियोगित्वात्मकत्वाच्च साधनाव्यापकत्वस्येति। नवीनतरास्तु न साध्यत्वं सपक्षे यत्रो

कथ्म

१५

पाध्यवधारणं।अन्यसाध्यत्वेनसंभाव्यमानत्वं।तद्देवकुतः।यदिव्यापकत्वादितिमन्वीरंस्तदेवतर्हिचक्रक
मापतितमित्यद्दकुर्यांप्रज्ञानमिति।अस्माकंत्वनिर्वचनीवादिनामत्रानास्त्येति।अस्कतन्त्र्येनोपाधिकसंवर्थेनि
श्चयोंतरंगत्वेनैवानेसाहतन्निश्चयश्चेति।साध्यव्यापकत्वादिपुरःकधर्मातरस्यानुपलब्धेसत्यांसतोश्चान्वय
व्यतिरेकयोर्व्याप्तिनिश्चयआयततेप्रासोतीत्यर्थः।अचेतनस्यचेतनाप्रेरितस्यकार्यजनकत्वाभावाच्चेतनप्रयुक्ते
त्वेन्वयव्यतिरेकयोरतिस्फुटत्वं।अन्वयव्यतिरेकवन्मात्रानुमानेपतनुपर्वतेतरत्वादेरप्यनुमानंस्यादतआहएव
मपीति।आंतरावुध्यैक्याध्यवसेवेतन्यधर्माएतद्वैसरीत्संवाल्यत्वं।एतस्यचव्याख्यानंविच्छिन्नेति।वंदनाद्यन्वयेपि
॥१५॥ सुखादिव्यभिचाराच्चनेकयमित्याह।यदिपुनरिति।सुखयतीतिसुखः।क्रमेणकतृष्टः।प्रधानेहेतोरपर्यवसानादर्थां
तरतामाशंक्याह।संसर्गपूर्वकत्वाहीति।नानात्वेनसहैकस्मिन्नर्थेसमर्थेसमवेतःसंसर्गस्तयोक्तः।परिमितत्वं ॥१५॥
किंउपोजनादिमितत्वमुतस्यसत्ताप्रतिक्रम्यवर्तमानेनवस्तुनासहवर्तनमथस्यासंसृष्टवस्तुमत्वंनाद्यस्त्याह
यद्वितावदिति।द्वितीयमाशंकतेन्येत्यादिना।कारणंहिकार्यांतरमपिव्याप्नोति।नकार्यमतोयावत्कारणंशक्तत
न्मात्रंतावन्नव्याप्नोतिनतः।गंधाद्यव्याप्तिस्त्वस्यप्रसिद्धैव।परिहरतिहंतेति।नतृतीयस्त्याह।परस्परसंसर्ग
स्त्विति।सत्वादीनांविवतित्वावक्त्यात्मनापरस्परसंसर्गेनास्तीत्यर्थः।रचनायाःप्रवृत्तेःसकाशाद्देदमाह
रचनाकेदारति।कार्यगतविन्यासविशेषादित्यर्थः।अपित्विस्यपाप्रवृत्तिःसापिचेतनाधिष्ठानमेवमपती

तिवक्ष्यमाणेनान्वयः।प्रवृत्तेर्हेतुमाह साम्येति। वैषम्यं भवतीति शेषः। वैषम्ये सत्यंगांगित्वं भवतीत्याह तथा चे
ति।अंगांगित्वात्कार्योत्पादनरूपा प्रवृत्तिर्न वृत्तीत्याह एवं हीति। एवं चांगित्वानुपपत्तेश्चेत्यस्यार्थः। तस्य प्रवृत्तेश्चेत्य
नेन पौनरुक्त्यमर्थान्निरस्तं। चेतनानाधिष्ठितप्रधानसाधकत्वेन परोक्तस्य प्रवृत्तेरिति हेतोरेव चेतनाधिष्ठितत्वे
तनसिद्धेर्हेतुत्वेनाभिधानात्।साध्यविरुद्धत्वोक्तिर्वक्रोक्तिः। औपनिषदेन न दृष्टांतानुसारेण ब्रह्म कारणत्वं संभ
व्यतेऽतः केवलस्याचेतनस्य प्रवृत्तिर्न दृष्टेत्यचोद्यमित्याशंक्याह त्वयापि चेति। उपनिषदर्थसंभावनायामनु
मानं सामान्यतो दृष्टं वाच्यमित्यर्थः। अविद्याप्रत्युपस्थापितेत्यादिना भाष्येण स्वपक्षं समाधास्यामीत्यभिसंधि
मानित्यर्थः। न केवलस्याचेतनस्य प्रवृत्तिर्दृष्टेत्येतत्सत्यमित्यर्थः। अत्र च रोचकत्वेन तथापि चेतनसंयुक्तस्य र
थादेरचेतनस्य प्रवृत्तिर्दृष्टेति भाष्यमनुसंधेयं। इत्थं केवलस्याचेतनस्य प्रवृत्तेरसत्त्वमभ्युपगम्याचेतन
स्य प्रवृत्तिश्चेतनाधीनेति समर्थिते सांख्य आहेत्यर्थः। न चेतनस्य प्रवृत्त्याश्रयत्वमित्यत्र लोकाय
तिकमतेऽपि लिंगमित्याह यतश्चेति। रचनायाः प्रवृत्तेर्वा हेतोर्विश्वात्मकारणकत्वसिद्धिर्न गतेत्यर्थः।
यदुक्तं न चेतनः प्रवृत्त्याश्रय इति तत्र किं स्वरूपस्यासिद्धिरुत मतोत प्रवृत्तिसंबंधस्य नाद्य इत्या
ह नेनावादिति न द्वितीय इत्याह। तत्रेति। आकाशस्य प्रवृत्त्यन्वयमात्रं चेतनस्य तु व्यतिरेकोऽप्यस्तीति वैषम्य
मित्यर्थः। लोकायतिकोऽपि चेतनतंत्रामचेतनप्रवृत्तिं मन्यते सांख्यस्तु ततोऽप्यविवेकीत्याह भूतेति।

क.ख

भूतानां चेतनेनेति येषां मतं तथोक्ताः। एवं तावदित्यादि विवृण्वन्मूलकारणस्याप्यचेतनस्य चेतनाधीनप्रवृत्तिकत्वं
प्रसाधितं तत्र दृष्टान्तासिद्धिमाशङ्कते स्यादेतदिति। रथादिप्रवर्तको देह एव स तु चेतनः न त्वात्मा विवेकिनां प्रसि-
द्धिरनूदितात्साक्षाच्चेतनः सोऽसङ्गत्वादप्रवर्तक इत्यर्थः। तवेति तवापीत्यर्थः। रूपादीनां संनिधिमात्रेणेन्द्रि-
यप्रवर्तकत्वे चेतनाधिष्ठितादचेतनात्कार्यरचनेति नियमभङ्गमाशङ्क्य परसिद्धमुदाहरणमिति परिहरति
सांख्यानां हीति। अर्थाकारेणेति अर्थविषयज्ञानाकारेणेत्यर्थः। उक्तं हि। राज्ञा दृगुपर्वा नामात्मोऽचनमा-
त्रमिष्यते वृत्तिरिति। यद्यपि योगिभिः सपक्षत्वमपि कथ्यं तर्हि साध्यपक्षनिक्षिप्तत्वादिति भाष्यमत आह सा-
॥१८॥ ध्यपक्षेत्युपळक्षणमिति। प्रधानस्य सहकार्यभावासिद्धेः सूत्रभाष्यायोगमाशङ्क्याह यद्यपीति। सर्गस्य
निर्माणि कर्मवासनानप्रबलवन्तीति चेन्न कृतार्हितास्तामुपयोगस्तत्राह प्रधानमेवेति। निमित्तं धर्मादि प्रकृती-
नां मूलप्रकृतेर्महदादिप्रकृतिविकृतीनां वा प्रयोजकं स्वस्य कार्यसर्गे किंतु वरणस्य भेदो भङ्गस्ततो निमि- ॥१९॥
त्ताद्भवति। क्षेत्रिकवद्यथा हि क्षेत्रकारी केदारादपां पूर्णात्केदारान्तरं समं निम्नं वापि प्लावयिषुरपो न पाणिना-
ऽकर्षति किंतु वरणं तासां भिनत्ति भिन्ने तस्मिन्स्वयमेवापः केदारान्तरं प्लावयन्ति तद्वदिति पातञ्जलसूत्रार्थः। तु-
ल्यपनीते प्रतिबन्धे सृजतु प्रधानमत आह ततश्चेति। सहातनादूपनायकात्सहापनीतः प्रतिबन्ध इति सदैव
सर्गः स्यादित्यर्थः। ईश्वरस्य तु सर्वज्ञत्वात्प्राणिकर्मपरिपाकावसराभिज्ञस्य ळीलादिना कदाचित्स्रष्टृत्वं।

सेनैव दृष्टांतेनाह ईश्वरस्येवेति। यदृच्छयेति। यथास्मदादेस्तृणच्छेदादौ नियतनिमित्तानपेक्षा प्रवृत्तिरेवमित्यर्थः।
वह्न्यादीनि। पित्तधात्वनुसारादिशब्दार्थः। कीदृशो नार्थयाति तस्य भोग इत्यादि भाष्यं व्याचष्टे। न केवलमिति।
सिद्धांतेप्यतात्त्विकभोगाभ्युपगमादवास्तवस्य ननिर्बंध इत्यर्थः। उभयार्थताभ्युपगमेपि भोक्तॄणां प्रधानमात्रेण
मानंत्यादनिर्मोक्षप्रसंगश्चेति भाष्यं तदनुपपन्नमिव अपवर्गार्थमपि प्रधानप्रवृत्तिरपवर्ग इति। किं निःशेषविकारा
नू भोजयितुं प्रवृत्तौ सत्यां क्रमेण भोगमोक्षोपपत्तेः भोगैश्वर्यादानंतविकाराणां युगपदुपभोगसंभवादित्याशंक्या
ध्न तावदपवर्ग इति। किं निःशेषविकारान् भोजयितुं प्रधानं प्रवृत्तमुत कियतोपि नांत्यहत्याह भोगस्य चेति। आद्यं निषे
धन् भाष्यमुपपादयति निःशेषेति। यद्यपि सकृच्छब्दाद्युपलंभाद्भोगः समाप्तस्तथापि न पुनरावृत्तिः। तत्त्वज्ञानमंत
रेण मोक्षासिद्धेरर्वाक् मोक्षाद्भोगस्यावश्यकत्वादिति शंकते कृतभोगेति। सत्वशुद्धिः। क्रियासमभिहारो
ऽभ्यासः। अपवर्गः किं शब्दाद्यनुपलब्धिर्बुद्धिक्षेत्रज्ञभेदख्यातिर्वा। यद्याद्यस्तत्राह हंतेति। न द्वितीयः इत्याह नचा
स्यारतिः। उभयार्थमिति भोगमोक्षार्थमित्यर्थः। शक्तिरशक्तिर्मनोरभेदात्सुरूपोद्वृक्कृच्छक्तिः। दृक्कृच्छक्त्यनुच्छेदव
दितिदानीं भाष्यपाठो दृश्यते निर्बंधानुसर्गशक्त्यनुच्छेदवदिति पाठं दृष्ट्वा व्याचष्टे सर्गेति। दृक्शक्तिः किं सर्वप्रधानका
र्यविषयैकदेशविषया वा आद्ये दोषमाह यथा हीति। यथैकेन पुंसा स्वविकारदर्शनेन कृतार्थापि सर्वशक्तिः—

पुरुषान्तरं प्रति दृष्टदर्शेऽपि तु मनुच्छेदादनुच्छेदेन प्रवर्तते एवं दृष्टशक्तिरपि सकृद्रूपदर्शनेन चरितार्थापि तं पुरुषं
प्रति सर्वप्रधानविकाराणामर्थवत्त्वाय सर्वान् द्रष्टुमनुच्छेदेन प्रवर्ततेत्यर्थः। द्वितीयं प्रत्याह सकृद्दृष्टेति। एक
पदेऽप्येकपदन्यासावच्छिन्नक्षणे। अर्थाभावसूत्रोक्तं दूषणमनुसन्धानाति मा भूदिति। शक्यार्थवत्त्वाद्दृष्टशक्तिसर्गश
क्यार्थवत्त्वं। शंकेत्येतत्त्रयस्य च्छेदः। प्रधानावस्थानात्रेण ठस्थावत्तं गुणानामनाशात्स्वरूपप्रणाशाभावादिति भा
ष्यायोगमाशंक्य विकल्पमुखेनाचष्टे यदि प्रधानावस्थेति। भाष्ये अनपेक्षस्वरूपाणामिति इतरेतरमनपेक्षा
णां गुणप्रधानहीनानामित्यर्थः। ननु प्राचीनवैषम्यपरिणामसंस्कार एव पुनर्वैषम्ये हेतुरस्तु किं वात्यस्य। क्षोभायि
१७। त्रातत्राह यत्तु साम्यावस्थेयेति। प्रलयसमये पुत्साम्याकारेण सुचिरं परिणतं तत्र संस्कारप्राबल्यात्पुनरपि साम्या १७॥
कारेणैव परिणमेत् द्वयोः संस्कारयोः समत्वेऽपि प्राचीनवैषम्यसंस्कारस्यापि नवसाम्यसंस्कारेण व्यवधाना
त्साम्यपरिणाम एव युक्त इत्यर्थः। वि क्षणश्चासौ कार्योत्पादनयित्तं प्रत्ययत आगच्छतीति नितभोक्तुः। एकादशेन्द्रिया
णां कर्थं सम्हत्वमित्याशंक्य बुद्धीन्द्रियाणि त्वगिन्द्रियेन्तर्भावयित्वा श्रोत्रमेवेति। अनेकरूपादिग्रहणसमर्थं
यत्त्व श्रोत्रं तदेव बुद्धीन्द्रियं तच्चैकमित्यर्थः। ननु तत्त्वम एव माभूद्धर्मास्तीत्यत्र तथा चक्रभ्रमदर्शनं व्याचष्टे तं के
स्तत्परतापकत्वावस्वत्राह नहीति विरेति। कर्तृस्थो भावः फलं यस्य स तथोक्तः। परसमवेतेति कर्मत्वव्यापकोक्ति

रिष्यं तद्व्यावृत्त्या तद्व्यावृत्त्यै न लक्षणोक्तिरिति स्वस्य सति वृक्षात् पतति पर्णे पर्णसमवेतक्रियाफलविभागभाजो वृ
क्षस्यापादानस्यापि कर्मत्वप्रसंगान्न त्वात्मानं जानाति पच्यते फलं स्वयमेवेत्यत्र कस्यापि कर्मकर्तृभावा
त्कर्मस्य कर्मत्वव्यापकत्वं। उच्यते। सोपाध्यात्मन्युपलब्धिभेदाद्देवमेदान्। निरुपाधौ यां वृत्तिं प्रति कर्मत्वं
तस्या एवोपाधित्व वर्णितत्वात्। पच्यते फलं स्वयमेवेत्यत्र कर्मत्वोपचारस्तान्यानि निर्हि कर्मवद्भित्याह। न
स्वाद्युत्कर्मतस्यरसमवेतक्रियाफलभागित्वमर्थो न तु यदुक्तं विधेयं तत्कर्मेति। ननु क्रियाफलशालित्वमात्रस्या
स्य कर्मत्वं वृथा परविशेषणं तथा च तत्पुरे च नप्य त्व मस्क तत्राह। नान्य त्वेरति। न प्यस्यतापकाद्द नन्यत्वे सत्य
कर्मत्वप्रसंगादित्यन्वयः। निदर्शनं चैत्रस्येवेति। स्वसमवेतागमनक्रियातस्याः फलं नगरप्राप्तिस्तच्छालिनोपि
चैत्रस्य परत्वाभावात् कर्मत्ववत्तप्यस्याप्यभेदाभ्युपगतावकर्मत्वप्रसंगादित्यर्थः। ननु यथा जलधिः स्वभा
वभूतैरपि वीच्यादिभिर्मुच्यते तथा तप्यतापकाभ्यामात्मा तत्राह जलधेश्चेति। अर्थस्यापि स्वर्गादेस्तापक
त्वं भाष्योक्तमुपपादयति। अर्थो पीति दुनोति परितापयति। दृक्छक्तिः पुरुषः। दर्शयति स्वविकारात् पुंस इति दर्शन
शक्तिः प्रधानं तस्य स्वबुद्धिरूपेण परिणतस्य विच्छायापत्तिः संयोगः। अविविक्तयोः प्रधानपुंसो दर्शनमविवेक
दर्शनं। भाष्ये स्यादपीत्यपि नानसाक्षात् पुंसो मोक्ष इत्यस्य सूचितं तदाहात्र चेति। वंधमोक्षस्वरूपाख्यो वनेतुयो:

प्रधानपुंसोर्दर्शनविवेकदर्शनं। भाष्येस्यादपीत्यपिनानसाक्षात्पुंसो मोक्ष इत्यसूचितदृष्टान्तश्चेति। बंध
मोक्षस्वरूपाख्यानेन तयोः साक्षाद्बुद्धिधर्मत्वमाह तथाहीति। अविभागो बुद्धिसत्वस्य पुरुषादविवेकस्तेन बुद्धे
र्दुःखपा अप्यापन्नं गुणस्वरूपावधारणमनुकूलप्रतिकूलशब्दादिज्ञानस्याविवेकिपुरुषज्ञानस्ये
बुद्धिपरिणामत्वाद्बुद्धेरेव बंधमोक्षावित्यर्थः। मोक्षनिरूपणाय च बंधनिरूपणमत एवापवृज्यत इत्ये
वाह। इदानीं स्वामिनि पुरुषे बंधाद्युपचारं सदृष्टान्तमाह तथापीति। अविभागस्यापत्तिः प्राप्तिस्तत्प्रेत्यर्थः। औपनिब
॥१८॥ द्दर्शनाऽलाभं जल्पं। निषेधति। नेति॥ किं वस्तुतः तप्यतापकविभागानुपपत्तिरुच्यते व्यवहारे वा आद्ये रबु
प्रसंग इत्याह एकत्वादेवेति। उपात्तं भाष्यं व्याख्यातियत इति। द्वितीयेनानुपपत्तिः। व्यावहारिकभेदस्वी १८॥
कारादित्याह तस्मादिति। परोक्तदोषानुवाद एव भाष्ये भाति न दूषणमित्याशंक्याध्याहारेणेष्टप्रसंगं कुर्व
नं परतां स्फोरयति इत्यस्मदिति। यदित्यन्तत्वं तप्यतापकभावस्य नत्वेष एव दोष इत्याशंक्य साम्यप्रतिपा
दनार्थं नचैवं पापीति भाष्यं तद्व्याचष्टे। सांख्यो हीति। ब्रुवाणोपीत्यन्वयः। सत्वं बुद्धिगतः सत्वगुणः। दर्शिनि
विषयो यस्य पुंसः स तथा तस्य भावस्तत्वं तत इत्यर्थः। अपि भागापत्तिस्तर्हि क्षीरनीरवत्स्यादिति तन्निमित्तान
प्तिः पुंसः सत्ता स्यादत आह तदविभागापत्तिश्चेति। अविवेकोऽत्यविभाग इति। नित्यत्वाभ्युपगमाच्चतापकस्येति

भाष्यमुपात्यै तम निर्मोक्षप्रसंग इति तस्यातीतानांतरपद्यानुषंगेण व्याख्या। न दृश्यतेऽनेन पुरुषतत्वमि
त्यदर्शनं तमः। तस्य तावद्धेतुत्वमुपपादयति न तावदित्यादिना। तमसः सत्वस्य निवृत्त्ययोगात्परस्य तन्नि
मित्त तद्योरनाशङ्कः। सिद्धांतेत्व विद्याया अवस्तुनस्तावद्धेतो विद्यया निवृत्ते मोक्षोपपत्तिमाह यथ्या हीत्यादि
दिना। सांख्यस्य लिपि तु शब्दैन शब्दसमी मानार्थः। महद्य्या। यद्यप्यस्य स्यप क्षे दोष परिहारस्य समृद्धि पाद
एवसंगतिस्तथापि यदि प्रधानगुणानन्वया ज्ञानन्तत्प्रकृतिकं तर्हि ब्रह्मविशेषणीगुणेन्वयान्नतदुपाद
नकमित्याक्षेपं तरसंगति छो जादि हच्छि खितं। तत्वज्ञान प्रधानस्यास्य शास्त्रस्य परमतनिरासपरत्वा
भावान्निराकृतो निराकर्तव्य इति वक्ष्यनिर्देशायोगमाशंक्याह यच्चेवेति। श्रौतब्रह्मर्थी सिद्धैतन्निरा
सरत्यर्थः। एतेन सत्रकारणकार्यान्यून परिमाणमिति नियमो नमनहे कारणविशेषगुणस्य का
र्येगुणारंभे नियमो नत्यन्तर इति सत्यपि को हेरीति साम्य कृतासि त्व परिहारः प्रपंच आरभ्यतर इति। कार
णगुणस्य प्रक्रमो नियतपूर्वसत्वं तेन तत्र समवायिकारणं कृत्वेत्यर्थः। तर्कस्य। विपर्ययमनुमाहतस्मा
दिति। विमतम चेतनोपादानकं कार्यद्रव्यत्वात्संमतवदित्यर्थः। तानादो व्यभिचार वारणाय द्रव्य पदं। मा
याशबलब्रह्मोपादनत्वेनासिद्धसाध्यत्वं व्यावर्तयितुमेवकारः। प्रधानसिद्ध्यर्थांतरत्वमाशंक्याहतच्चेति।

इत्युक्तमिति। एतेन शिष्टापरिग्रहा इत्यत्र तत्पूर्वपक्ष इत्यर्थः। महाद्रव्ये प्रयत्नाभिघाताद्यभावात्कथम
णुषु कर्म तत्राह। अदृष्टवदिति। ननु किं द्व्यणुकारंभकावयविना ऽत आह बहुत्वस्येति। असंयुक्तानामारंभा
नभ्युपगमात्सिद्धसाधनमाशंक्याह संयुक्ता इति। सहसेति। द्व्यणुकमनारभ्येत्यर्थः। अनेन बाधो
ऽयोदिनः। तत्त्वादिषु व्यभिचारवारणार्थमपक्कत्व इति। द्व्यणुके स्थानैकान्तिकत्ववारणार्थं परमेति।
परमाणुद्वये स्यापेक्षया स्थूलद्व्यणुकारंभकेऽव्यभिचाराय एवं दुत्वादिति। साध्ये चैकद्रव्यमात्रं
क्याह यदि हीति। परमाणवः किमनारभ्य द्व्यणुकादीनि कुंभमारभंते उतारभ्य नाद्य इत्याह न घटशालि ॥१५॥
१५॥ सत्येव घटे बुध्याविभज्यमाने कपालादिखंडावयविनोपलब्धेरित्याह तत्र सरेणुवदनुपलब्धे
रेरसोपरेखे घटेषु संस्थानविशेषानिष्पत्तेर्व्यंजकाभावात्। घटत्वानुपलब्धिप्रसंग इत्यर्थः। नद्वि
तीय इत्याह। घटस्यैवेति। यदि हि परमाणवश्च खंडावयविनं आरभ्य महावयविनमारभंते तथा
सति सर्वस्मिन्नेव परमाणुषु समवेषु सत्सु च भूतानामवयवावयविभावविरहिणामेकदेशताभाव
नियमात्। अवयवावयविनोर्हि तन्तुपटादेरेकत्र संयोगिभूभागे भवतो ननु परमाणुषु समवयता
भवयविनामास्ति परस्परमवयवावयविभावरहितेन समानदेशता। तस्माद्यदि परमाणुभिः स्थूल

मारभ्येन घट एवारभ्यः स्यान्न कपालादीनीत्यर्थः। यदि च घट एव परमाणुभिरारब्धस्तदा न केव
लं विद्यमाने घटे संस्थानानुपलंभप्रसंगः किंतु नाशादूर्ध्वमपि कपालाद्यनुपलंभप्रसंगश्च स्या
त् तथा सतीति। न च वाच्यं कुंभभंगसमनंतरमवस्थित संयोगसचिवाः परमाणवः कपालकणादी
नारभंते सति तु कुंभे तेन प्रतिबंधात्सतोपि संयोगा नारभंतरति। यतः कपालादीनामेव सत्त्वसारंभसं
स्थानानुपलंभः स्यात् द्व्यणुकादीन्यारभ्यत दारंभेमूर्त्तानां समानदेशत्वायोगो द्व्यणुकादिक्रमेण त
दारंभे कुंभारंभोपि तथा भवत्विति हि व्यामुग्धवर्णमिति। ननु द्व्यणुकैरपि यदि बहुभिः कार्यमार
भ्यते तर्हि ~~परमाणुभिरपि~~ घटादयो व्यारभ्यंतां तथा चांतराळिककार्यानुपलंभप्रसंगः। उच्यते
त्रसरेणुरेवारभ्यते तर्हि परमाणुभिरपि स एवारभ्यतां मुधा द्व्यणुकं विशेषो वा वाच्यः। उच्यते। किंस
र्वत्र परमाणूनामारंभकत्वं उत क्वचिद्द्व्यणुकादिप्रक्रमोपि नाद्यः। यतो शिलावल्लोष्टमूलावयव
परमाणुसंख्यापेक्षया लोष्टावयवमूलपरमाणूनां संख्यापकर्षोऽन्यथा लोष्टतद्वयवयोर्गुरुत्वादि
साम्यप्रसंगादेवं तदपेक्षया तदवयवतदवयवानां मूलावयवपरमाणुसंख्यापकर्षो दृष्टव्यो। न चायं
निरवधिरेकत्वात्परं न्यूनसंख्याऽसंभवान्न च त्रित्वमारंभकसंख्यावधिस्ततः परमण्वेकत्वादित्व
त्वावान्नवैकत्वमेकस्य संयोगानुपपत्तावसमवायिकारणविधुरस्यानारंभकत्वात्तस्मात्सजातीयसं

मुक्त॰ २

पुञ्जपरमाणुगतद्वित्वमारंभकसंख्यापकर्षावधिरिति सिद्धं द्व्यणुकं। तथा च न सर्वत्र परमाणुभिस्त्र्य
णुकारंभः। नापि द्वितीयः। सिद्धं हि परमाणोस्त्र्यणुककारणं द्व्यणुकं प्रति कारणत्वं। तथा च न तस्य कदापि
द्व्यणुकाकारणत्वं संभवः। कारणकारणजातीयस्य कार्यकार्यजातीयं प्रत्यनारंभकत्वात्। न ह्यंशु
जातीयस्तंतुकार्यपटजातीयमारभत इति। बहुत्वं प्रति बहूनां परमाणूनां समवायिकारणत्वाद्द्व्यं
प्रतीत्युक्तं। प्रलये स्वसृष्टादीनामपेक्षाबुद्ध्यभावमाशंक्येश्वरबुद्धिमित्युक्तं। तदपि हीति। परिमाणस्य
॥२०॥ सजातीयपरिमाणारंभकत्वनियमादित्यर्थः। कारणबहुत्वेति। समपरिमाणद्वंद्वसंयोगवत्तंत्वारब्ध
पटयोर्मध्ये यद्यन्यतरस्मिन्महत्वमुद्रिक्तं तस्य कारणबहुत्वादुत्पत्तिः समसंख्यद्वंद्वसंयोगवत्तंत्वा
रब्धयोस्तु कारणमहत्वात्। समपरिमाणसमसंख्यतंत्वारब्धयोः पुनः कारणप्रचयादित्यर्थः। प ॥२०॥
न्यात् तूलपिंडानां प्रचयस्य द्व्यणुकयोर्नास्तीत्यत्र हेतुमाह तदवयवानामिति। प्रचयो त्वारंभकावयव
गतः शिथिलसंयोगः समतुलिततूलपिंडद्वयाभ्यामारब्धयोर्महत्तूलपिंडयोरन्यतरमहत्वानिश्चय
कारणं। न चैवं द्व्यणुकयोरवयवानां परमाणूनां योगेन लग्नत्वं भागेनालग्नत्वमित्येवंरूपः शिथिल
संयोगो निरवयवत्वादित्यर्थः। यदि द्व्यणुकगतासंख्यैव त्र्यणुकगतमहत्वकारणं तर्हि त्र्यणुकादि
गता संख्यैव तत्कार्यमहत्वहेतुरस्त्वित्याशंक्य तत्र महत्वादिसंभवाद्दानिलमरस्माह त्र्यणुकादि

निरिति। समानजातीयगुणान्तरमारभन्त इति दूषणं व्यभिचाराद्धेतोर्दूषणीक्रियते सूत्रकारेणेत्या
हुक्ताप्यकार इममभ्युपगमं तदीयपैव प्रक्रियपेत्यादिभाष्येणेति शेषः। सूत्रमुद्धृत्य व्याचष्टे य
थेत्यादिना। यथाश्रुतिसूत्रे पारिमाण्डल्यादपि महद्दीर्घं जातिसत्त्वायुक्त इति मत्वा वक्ष्यनुक्तेति। अ
नुक्तमेव दर्शयति यथा द्व्यणुकमिति। सूत्रे वर्तते रथस्त्वादृण्वित्यस्य व्याहृते त्वसंतत्यावयथाक्रमं ह्रस्वपरि
मण्डलाभ्यां महद्दीर्घाणुवदिति सूचनाय वा शब्दस्य चः परिमाणविशेषरूपपारिमाण्डल्यं न द्व्यणुकेपा
रिमाण्डल्यमपरमारभत इति भाष्ये परमाणुपारिमाण्डल्यात् द्व्यणुके पारिमाण्डल्यारम्भनिषेधादर्थाद्
द्व्यणुकगताणुत्वस्य पारिमाण्डल्यादारम्भ इति भ्रमः स्यात्तं निरस्यति पारिमाण्डल्यग्रहणमिति। ननु सूत्रे
ह्रस्वपरिमाणस्य महद्दीर्घारम्भकत्वं पारिमाण्डल्यपरिमाणस्य ह्रस्वपरिमाणारम्भकत्वं च भाति। न ह्यणु
क्रमनन्तरनिषेधाद्यत आह गुणिपरमिति। परिमाणवद्द्रव्याभ्यां द्रव्यारम्भ उच्यते न तु गुणारम्भ इत्यर्थः।
द्व्यणुक इति सन्नम्य एकवचनं कृत्वा वाक्यार्थमाह। द्व्यणुकाधिकरणे इति। ननु द्व्यणुकगतद्वित्वयोः
कथं चतुरणुकारम्भकत्वं संख्यायाऽद्रव्यारम्भकत्वायोगादत आह संख्येयानामिति। जायते यद्यानु
वंगमाह इति योजनेति। पारिमाण्डल्याद्यारम्भ आपादिते विरोधिपरिमाणान्तराक्रान्तिरसिद्धेत्याशंक्याह
स्वकारणेति। स्वकारणं संख्या। व्याप्ते व्यभिचार उक्ते यत्र व्यभिचारस्तत्रास्यानारम्भे कारणमित्येताव

कर्म
२
५

दुच्यते उत तत्कारणशक्तित्वेन व्याप्तिर्विशेष्यते नाद्य इत्याह कारणगतेति। द्वितीये किमणुमहत्परि
माणाभ्यां द्व्यणुकत्र्यणुकयोः स्वरूपेण व्याप्तिः पारिमाण्डल्याणुत्वयोरनारंभकत्वे हेतुरुत तत्कारणेन वा
द्य इत्याह अपि चेति। न चरम इत्याह न चेति। परमाण्वादौ पारिमाण्डल्यादिगुणवति सति तद्द्वारा द्व्य
णुकगतद्वित्वबहुत्वयोर्वा संनिधानविशेषादणुमहत्त्वाद्यारंभकत्वमित्याशंक्य कानिरासार्थं व्याख्यं
तत्व्याचष्टे न च परिमाणांतरारंभ इति। न च परिमाणांतरे व्यापृततापारिमाण्डल्यादीनां पारिमाण्डल्या
द्यारंभेऽपि व्यापृततापारिमाण्डल्यत्वादित्यर्थः। कारणबहुत्वादीनां संनिधानं पारिमाण्डल्यादीनामसंनि
२९१ धानमित्येतच्च नास्ति कारणे कार्यसमवायस्य तुल्यत्वादित्यर्थः। कारणावस्था इत्यमिति। द्व तद्द २९५
वत्वेव वक्ष्यमाणमात्रे प्रेत्यभाष्ये द्रव्यस्य संयोगवद्वा त्वत इति॥ ननु आरंभकत्वगुणं कार्ये स्वजातीयसम
वापि गः। विशेषगुण इत्यस्य व्याख्या। न तेः कानु प्रतिक्रिया। उच्यते। न तावद्विशेषगुण इति क्रमः।
यतूहयनेन लक्षणमभाणि। स्वाश्रयमवच्छेदो वितावांतरसामान्यविशेषवत्त्वं तो विशेषगुणा इति
नवसुमध्ये यस्मिं द्रव्ये वर्तते तस्येतराद्रव्येभ्यो व्यावर्तकत्वलक्षणं जयति। एवं च नवान्यतममात्रवृ
त्रिगुणत्वं लक्षणं तत्र किं नवान्यतममात्रवृत्तित्वं। न च सुमध्येऽपि एकैकमात्रवृत्तित्वं वा न व्यतिरिक्तव्य
तिरिक्तमात्रवृत्तित्वं वा पृथिव्यादि न च लक्षण अतिरिक्तानेकसमानाधिकरणत्वानापादिद्वके सामान्य

वत्वं वा। नाद्यिमः अव्याप्तेः। नाद्वितीयेऽतिव्याप्तेः। न तृतीयः। सत्येवं पृथिव्यादीनां यानि नवळक्षणानि
तेभ्यो यानि व्यतिरिक्तानि तेभ्योपि व्यतिरिक्तानि तान्येव नवळक्षणानि। तैरनेकैः समानाधिकरणत्वा
नापादकानि यानि गंधत्वादीनि तद्वत्त्वं विशेषगुणत्वं। तथा च विशेषगुणस्यैकैकपृथिव्यादिनिष्ठ
त्वसिद्धिरिति। तन्न। किमिदं नवळक्षणव्यतिरिक्तव्यतिरिक्तत्वं। नवत्वविशिष्टव्यतिरिक्तत्वं वा तदु
पळक्षितव्यतिरिक्तव्यतिरिक्तत्वं वा नाद्यः। नवत्वविशिष्टसमुदितातिरिक्तैकैकपृथिव्यादिळक्षणे
भ्यो व्यतिरिक्तानि यानि गुणादिळक्षणानि तैरनेकैः समानाधिकरणत्वानामपादकपरिमाणत्वसा
मान्यवतः परिमाणस्यापि विशेषगुणत्वापत्त्यातिव्याप्तेः। न द्वितीयः। उपळक्षितैकैकातिरिक्तनव
त्वविशिष्टपृथिव्यादिळक्षणव्यतिरिक्तानेकगुणादिळक्षणसमानाधिकरणत्वानापादकपरिमा
णत्वसामान्यवति परिमाणेपि गतत्वेनोक्तदोषतादवस्थ्यात्। गुणत्वावांतरजातिद्वारैकेंद्रियग्रा
ह्यसजातीया ये रूपादयो यानि च धर्माधर्मभावनासांसिद्धिकद्रवत्वानि तेभ्यो व्यतिरिक्तत्वं विशेष
गुणत्वमिति चेत्। न मिळितव्यतिरिक्तैकैकव्यतिरिक्ते एकैकव्यतिरिक्तमिळितव्यतिरिक्ते च संख्यादाव
तिव्याप्तेः। स्वसमवेतविशेषणविशिष्टत्वे सति स्वाश्रयैकजातीयव्यवच्छेदकत्वं विशेषगुणत्वं यो म
त्रिवोक्तमशिवं। स्वगतसंख्यात्वादिविशेषिते द्रव्यजातीयपृथिव्यादिव्यवच्छेदकैः संख्यादिभिरति

व्याप्तेः। गगनत्वविरहेणैकजातीयकस्वाश्रयाव्यवच्छेदकशब्दव्याप्तेश्च स्वाश्रयैकजातीयपदेन नवा
न्यतमविवक्षायामुक्तदोषादिति। एवमन्यदपि संभवल्लक्षणं स्वयमूहनीयमिति। किंच कारणेकार्थसम
वायविशेषान्महत्त्वमिव महत्त्वान्तरमणुत्वमपि कारणगतं कार्येऽणुत्वं किमिति नारभते। कार्यस्याप्य
णुत्वे भोगातिशयासिद्धेर्नारभत इति चेन्न। तर्हीहापि सर्वत्र जगति चेतनारंभे शेषशेषिभावाभावाद्भो
गानस्पदत्वात् मायाशबलब्रह्मण उपादानत्वान्मायागतं जाड्यं जगति जाड्यमारभते न ब्रह्मचेतनो
चेतनां। जीवेषु तु ब्रह्मभावच्छेदेषु चेतनानुवर्त्स्यतीति तुल्यं। तदुक्तमाचार्यवार्त्तिककृता। तमःप्रधानः क्षे
त्राणां चित्प्रधानश्चिदात्मनां। परः कारणतामेति भावनाज्ञानकर्मभिरिति। उभयथेत्यादेः। अस्य प्रासंगिकेना
॥२२॥ न्तराधिकरणेन न संगतिरिति व्यवहितेनोच्यते। प्रधानं चेतनानाधिष्ठितत्वान्न कारणं चेत्तर्ह्यणवस्तदधिष्ठि ॥२२॥
तानां वा तु कारणमिति। सुखबोधाय सूत्रमाक्षेत्रेधायो जयति परमाणुनामित्यादिना। अबोधरूप आत्मादेरचे
स्वाश्रयपरत्वेवदन्तामणवः किं न स्फुरितीत्यणुसमवायी त्युक्तं। ननु कर्मणश्चेतनानधिष्ठितत्वमसिद्धमीश्व
राधिष्ठितत्वादत आह निमित्तेति। उपरिष्टादितिपत्स्वरित्यत्रेत्यर्थः। भाव्येस्वानुगतैरिति न जात्यैव व्यक्ती
नामनुगतत्वमुक्तत्वात् इत्याह स्वसंबद्धैरिति। संबंधोपि न संयोगरूपः स्वसंबंधश्चेति। अथारीति रन्ध्रत्वपो
नित्यपोगे। अतश्चायुतसिद्धिसिद्धेर्न कुंडवदरे संयोगेति व्याप्तिः समवायप्रमाणमाह रहेति। रह

प्रत्यक्षकार्यगम्य इत्यर्थः। संस्कारो वेगादिः। अभिघातः क्रियाविशिष्टद्रव्यस्य द्रव्यांतरेण संयोगविशेषः।
पन्थोद्यमिति निपातितमुसलस्योलूखलेन। नोदनं तु संयुक्तस्य सत एव संयोगः प्रयत्नविशेषापेक्षः। यथा
संनद्धकरशरसंयोगः। क्षेपणानुकूलप्रयत्नापेक्षः। निमित्तापेक्षत्वेन समानयोगक्षेमो नोदनं संस्कारावि
त्यः। तदानीमवयवस्यैव तन्मयमस्तीत्याशंकयाह क्षेत्रज्ञस्येति। शंकत इति। परमाणूनां कल्पिता इति वक्ष्यमा
णप्रातीकग्रहणेनास्यानुषंगः। ननु परैः कल्पिताः प्रदेशा नेष्यंते किंतु परमाणोः संयोगस्य वृत्यवृत्ती
रत्याशंक्य वृत्यवृत्तिपक्षे व्याघातान्निरस्तोऽगत्याभावाद्वैशेषिको यदि परमाणोः संयोगस्याव्याप्यवृत्तित्वमे
कल्पितं प्रदेशं मन्येत स भाष्य आशंक्य निरस्यत इति वक्तुं वृत्त्यवृत्तिपक्षं तावदाह यद्यपीति। व्याघात
माह सिद्धांतीकेनेति। परिहरति वैशेषिकः एवेति। घटादिषु हि संयोगस्य वृत्त्यवृत्ती दृश्येते। यदि तत्राप्यवय
वविभागेन। तर्हि यथावत्परमाणु तथात्वे परमाणोश्च निरंशत्वे संयोग एव न स्यादिति दृष्टसृष्टी एवं तस्या
व्याप्यवृत्तित्वेत्यर्थः। सूक्ष्मारांसु परिहारमाप्याद्ये इत्यर्थः। शंकामूलपाः सूक्ष्मारत्वसिद्ध्यर्थं दृष्टसृष्टिपक्षं दूषय
तिनत्वस्तीति। यदि भावाभावयोरेकत्राविरोधः स्यात्तर्हि न कश्चिदपि भेदो वकाशमासादयेत्स तर्हि विरुद्धं दृष्ट्वा
मर्ध्यासरूपः। विरोधाय वत्व पाठजलांजलिर्दत्त इत्यर्थः। प्रदेशाकल्पनयापि कल्पत इति परेणाव्यंगीका
र्यमित्यर्थः। नन्वभिघाताद्य इति आकुप्रत्यया दृभिघातादीनां हेतुत्वसंज्ञवादित्यर्थः। सर्वस्मिन्नेणाव

२२

पर्यायेणाभिधानाद्द्वयोर्न संकवंतीत्यत्र हेतुमाहमाह नियमेति। सत्यपि पृथिव्यादौ शरीरादिद्रव्या
देवदुःखजोदृशिद्धेरप्रयोजकत्वात्तस्मिन् पृथिव्यादिद्रव्य इत्याह तथापीति। न च तन्मते तावन्नं समवा
यः संबंधिभ्यां कल्पिततादात्म्यवान्। तथा च स्वत्वं तोसंबद्धः सन् संबंधिनो न घटयितुमर्हतीत्यर्थः।
समवायस्तु तु पराभ्यां संबद्धस्तन्नियामकत्वात् तत्कारणवदित्यत्रासंबंधत्वमुपाधिमाशंकते अथा
साविति। अनवस्थयापक्षे साध्याभावनिश्चयात्पक्षेतरस्याप्युपाधिता। संबंधिनोः परस्परं स्वस्य च ता
भ्यां संबंधनमविच्छिन्नत्वापादनं परमार्थः स्वभावोऽयस्य तत्वादित्यर्थः। स्वस्य संबंधिभ्यां तैर्वै संबंधनात्मत्वं
॥२३॥ नित्यपरतंत्रत्वादित्याह नासाविति। संबंधिनोः संबंधनात्मत्वे हेतुमाह नस्ततास्मिंनिति। स्वसत्तायां संबं
धिनोरसंबंधाभावान्न समवायस्य तत्संबंधने स्वातिरिक्तसंबंधापेक्षेत्यर्थः। समवायः समवायिनोरितियत ॥२३॥
त्स्वभावादिति योजना। किमसंबंधत्वमुपाधिरसमवायित्वं वा नाद्यः संयोगे साध्याव्याप्तेरित्याह संयोगो
पीति। समवायेन तु अव्याप्यत्वात्संयोगोऽप्यसंबद्धः प्रसज्येत तन्नैवं तत्वमपेक्ष्यते ततः साध्याव्याप्तिरित्यर्थः। पक्ष
द्वयेऽपि पक्षेतरत्वं चा। यः संबंधः समवायो वा स स्वसंबंधानपेक्ष इत्युपाधिव्यतिरेके दृष्टांताभावात्। न चान
वस्थायां पक्षे साध्याभावनिश्चयादयं दोषः। तथा सति समवायस्यैव दृष्टांतत्वे वा समवायस्य संबंधापेक्षानु
मानमाश्रयासिद्धं परसिद्धमाश्रित्य परेषामनिष्टापादनादिति। अगुणत्वे सत्यसंबंधत्वं संबंधापक्षा

व्या
यामुपाधिस्तथावन साध्याव्याप्तिरिति शंकते यद्युच्येतेति। संयोगस्य गुणत्वमसिद्धमिति साध्याव्याप्तिस्तद
द्रव्यस्थेत्ताहृयद्यसमवायरतिसंबंधात रसापेक्षेपि संयोगेनास्य गुणत्वे सत्यसंबंधत्वमस्मन्मतेस्यागु
णत्वात्संबंधत्वाच्चतःसाध्याव्याप्तिरित्यर्थः। ननूभयसिद्धस्थलेसाध्याव्याप्तिर्नैयायिकमते चसंयोग
स्यागुणत्वमसिद्धमित्याशंक्याह परमार्थतस्त्विति। अयं परिहारस्तत्रिशेषः। द्रव्याश्रयीत्यक्तमिति। नवद्र
व्यासमवेतो गुणो भवतीति ग्रंथेरित्यर्थः। अयं भावः। अगुणत्वे सत्यसंबंधत्वमित्युपाधेर्व्यतिरेक एवं
वाच्यः समवायः संबंधानपेक्षः। अगुणत्वे सति संबंधत्वादिति। अनंतावत् दृष्टान्ताभावादनध्यवसित
त्वं। न च व्यतिरेकित्वं। अभावे साध्यवत्यपि हेतोरवृत्तेः। विशेषणवैयर्थ्यं च। संयोगस्य प्रागुक्तनीत्या
स्वाभाविकद्रव्याश्रितत्वप्रयुक्त्याऽगुणत्वोपपत्तावव्यवच्छेद्यत्वादिति। समवायः समवेतःसंबंधत्वात्संयोगव
दित्यप्यनुमानं द्रष्टव्यं। संयोगे संबंधत्वे सति संबंधापेक्षत्वे कार्यत्वमुपाधिः ज्ञात्वादौ साध्याव्याप्तिवारणा
र्थं संबंधत्वे सतीति साध्यविशेषणं। तथा च कार्यत्वं समवायाद्व्यावर्तमानं स्वव्याप्तां संबंधत्वे सति संबंधा
पेक्षां वारयेत् संबंधत्वं च समवाये उभयवादिसिद्धमतोऽर्थात्संबंधापेक्षाव्यावृत्तिसिद्धिरित्याशंक्याह न च
कार्यत्वादिति। आत्माकाशसंयोगे साध्याव्याप्तिमाह अजसंयोगस्येति। अजसंयोगश्च साधयिष्यते। ये
तु समवायस्य कार्यत्वं स्वीकुर्वते च समापि कारणानपेक्षत्वे संबंधत्वे न हेतुनासंयोगवत्समवाये

कल्प २

यस्यापि कार्यत्वं साधयन्नु। साधनव्याप्तिमाह। अपि चेति। ये तु समवायस्य कार्यत्वं स्वीकृत्यैव समवायि
कारणानपेक्षत्वेन समवायांतरापेक्षां न मन्यंते प्राभाकरास्तान्प्रतिप्रतिबंध्यासमवायांतरापेक्षामुप
पादयति तथा चेति। संयोगप्रतिबंदीमुपसंहरति तस्मादिति। ननु संयोगस्यापि संयोगिभ्यामसंबंधे एवम
ति वतु तथा च कुतः प्रतिबंदी नैकाश्चिच्छंकते यद्युच्येतेति। दूषयति तत्किमिति। संयोगिनोरिति सप्तमी। यद्वि
परमाणुमंगीकृत्य रूपादिमत्त्वेन सावयवत्वमनित्यत्वं च साध्यते तत्र्याश्रयासिद्धिरित्याशंकामाह यत्कि
ञ्चेति। मूलकारणमुभयसंमतं पक्षः। तद्यदि रूपादिमत्तर्हि सावयवत्वाद्यायाद्यमिति नाश्रयासिद्धिरि
॥२४॥ त्यर्थः। नन्वेवमपि पक्षधर्मत्वासिद्धिः स्यात्स्यात्सिद्धांते मूलकारणस्य रूपादिमत्त्वानभ्युपगमादत आह ॥२४॥
रकेति। यद्यपि पर्वते अग्निमत्त्वमभ्युपगम्यते म॰ तथैव धूमवत्त्वं तस्मादित्याद्यावत्प्रमितं स्यैवाभ्युपगममात्रे
व्यापारकत्वदर्शनादिति भावः। अंशे प्रागेव्यापाद्यापादकयोर्व्याप्तिः प्रमिता यथा व्याप्य दहनमग्निमत्त्वे धूमवदि
त्याप्तेः प्रमितत्वात्तदिदमुक्तं नियतेति। ननु व्याप्यारोपाद्व्यापकारोपः प्रसंगः कथमनेन वस्तुसिद्धिरित
आह। तदनेनेति। तदिति तत्रेत्यर्थः। विमतं सोपादानं भावकार्यत्वात्संमतवदिति सामान्यतः प्रवृत्तानु
मान नत्रकोपि दृष्टं हितं निस्यापकब्रह्म विषयं क्रियत इत्यर्थः। जगदुपादानं नस्य शक्ति न च प्राणुनि

निरस्तत्वादत्यंताभाववादिनामनुमानपर्यवसानं। सत्यपि स्पर्शादिमत्त्वे मूलकारणस्यत्वमनुमानात्सि
द्धौ तीस्पर्शवत्त्वस्य तन्निपक्षमात्रं कथं दूषयतीत्याह परमाणुनित्यत्वे सतीति। कारणाभावादेव नित्यत्वासिद्धेः का
रणाग्रहणोक्तिर्व्यर्थेत्यत आहापि चेति। परमाणुर्नित्यः अवयवविनाशावयवविभागरहितत्वादात्मवदित्येतत्तु सु
खादिभिर्व्यभिचारं द्रव्यत्वे सतीति विशेषणादित्याह न च सुखादिभिरिति। ननु स्छिन्ने घृते काठिन्यनाशो भाव्य
उदाहृतः उत घृतस्यापि नाशो द्रव्यध्वंसस्योदाहरणं ध्वंसे तु अवयवविभागपूर्वकत्वात् तत्रापि घृतनाशस्य सा
ध्यसमत्वमिति तत्र साध्यसमत्वमुपादरि हरिष्यति काठिन्यं तावत् घृतस्यावस्थानवद्दार्ढ्यमिति केनासंगतिः प
टादीनामपि तंत्वाद्यवस्थाविशेषत्वेन तत्त्वांतरत्वाभावादित्याह द्रव्यस्य रूपापरिज्ञानादिति। अथैषा दारन
णाधिकरणे। ननु विशेषावस्थापि संयोगपूर्वेति नेत्याहैतच्चेति। एकं त्वनुगतद्रव्यं कारणभूतं सामान्यं नत
स्य संयोगरत्वर्थः। कारणस्य सामान्यत्वमुपपादयति मृद्वेति। कारणस्यैव कार्यरूपसंस्थानात्मकत्वमाहा
नवैतरानीति। शाकल्यमित्यारभ्य नुचकावांतरे। विकार उक्तः। ननु किमनुगतद्रव्यकल्पनया व्यावृत्ताः कपा
लशकलादय एव घटनुचकादीनारभ्यंतामत आह तत्र तत्रेति। सत्यपि जनकत्वाविशेषे कुम्भकार
हेमकारादयो न कुम्भनुचकादीनामुपादानं न हि ते तांस्तादात्म्येनोपादाना दृश्यंते। मृत्कनके तु प्रत्यानमि
ति अवस्था तादात्म्यकारिता। समवायस्य प्राङ्निरस्तत्वात् तादात्म्यं नानुवृत्तेयोरेव मही हेम्नो घटनुचका

कब्म २

दृष्टवनुभूयते नेतरेतरव्यावृत्तानामित्यनुगतद्रव्यमेवोपादानमित्यर्थः। ननु सत्कपादानेनु वृत्तिमारहत्ति
विंतातद्देवनेतिवौद्धमतमाशंक्याह। न च विनश्यंतमिति। प्रतीत्यप्राप्य। एवं यद्दात्वयास्तविशेषं सामान्या
त्मकं कारणं विशेषवद्वस्थंतरमापद्यमानमारंभकमभ्युगम्यत इति भाष्यमुपादितं इदानीं तु तद्दाघृत
स्यकाठिन्यविलयनवादित्यादिभाष्यं कृतीयोतं व्याचष्टे एवं व्यवस्थित इति। यत्तु घृतस्यापि नाशाभ्युपग
मेऽवयवविभागस्य सद्भावात्साध्यस्य सतत्वमिति। तत्रघृतनाशो नोपपयते। काठिन्यसंस्थाननाशस्त्वेन
चतत्र विद्यमानोप्यवयवविभागः प्रयोजकः परमाणुगतकाठिन्यनाशेद्रवत्वोदये च तदभावादित्याह न
चतत्रेति। यथा कार्यद्रवत्वात्परमाणौ द्रवत्वकल्पना तथाकाठिन्यमपि कल्प्यं न चेन्नेतरदपि। न केवलं पर
।२५।। माणुदृष्टांतोऽवयवविभागाद्यभावउपजीव्यः किंतु कार्यकारणाभेदाभावेपीत्याह न च काठिन्यद्रवत्वेरति ।२५।।
परंमाणुष्वगुणोपचयापचयाभ्यामुपचितापचितावयवत्वप्रसंजनमयुक्तं अन्यत्वाद्गुणानां द्रव्यस्य निर
वयवत्वाविद्यातादित्याशंक्य गुणसमुदायत्वं परमाणूनां वक्तुं कार्यस्य गुणसमुदायत्वं तद्वृद्धि-ह्रासा
भ्यां वस्थौल्यसौक्ष्म्ये दर्शयति। अनुभूयते हीत्यादिना। येन मिलिता गुणास्तेन कारणेन स्थूलाः संत
स्तोविशेषाख्या दृष्टान्तव्यवहारवंतस्तेच सात्विकत्वादिनाशांततादियोगिनरत्यर्थः। परस्परं गंधादीनाम
नुप्रवेशाद्द्रव्यसंज्ञा लब्धा रसाद्यः पृथिवी जलत्वादिना शांततादियोगं धं धारयंति रूपादय आपो

भूत्वा रसं धारयंति स्पर्शादयस्तेजो भूत्वा रूपं धारयंति शब्दः स्पर्शौ समुदायश्च वायुर्भूत्वा स्पर्शं धारयतीत्य
र्थः। उपचितगुणानां मूर्त्युपचयादिति भाष्योपादानं। उपचयमात्रेण न संघातात्मकमूर्त्यार्थिक्यमतो व्या
ख्या संहन्यमानानामिति। संघातेति मूर्तिर्विशदव्याख्या। यत्स्कृत्रूत इति आगमनाद्दर्त्ये। इत्यर्थः। गुणसंघा
तोपचयापादाने इत्यप्रसंगतामाशंक्याह दृव्येयत्यनूपेति। परमाणुषु गुणोपचयान्मूर्त्युपचये साध्ये कार्येषु
दृष्टोपचयान्मूर्त्युपचयप्रदर्शनं न तावद् दृष्टांतत्वेन साध्यसमत्वान्नापि हेतुत्वेन। व्यधिकरणत्वादित्या
शंक्याह न तावदिति। दृष्टांतोक्तिस्तावदियं तत्र साध्यसमतापरिहरतीति कार्येष्वेति। भावे चोपलब्धेरित्य
त्रोक्तरीत्यर्थः। योगतेमतेसंघातो ऽनर्थिष्टात् कः। सिद्धांते त्वीश्वरस्थीनः उपादानं चगंधादीनामस्य व्याकु
तमितिर्विकेदः। उत्सूत्रमिति। उत्सूत्रवाक्यमित्यर्थः। सौत्रचशब्दव्याख्यानत्वात्तत्स यद्वार्थी दूषणस्य। भाष्य
द्रव्याधीनत्वं द्रव्याधीननिरूपणत्वं न नु तत्तद्रूपसाध्यत्वं केषांचिद्गुणानां सामान्यादीनां च तदभावात्। द्र
व्याधीनत्वमुपपादयति नाहीत्येतेति। पूर्वेन्यमतोक्तित्वाद्द्रव्यस्य गुणसंघातमात्रत्वमुक्तं इदानीं वैशेषि
कदृष्ट्या द्रव्यं किंचिदभ्युपेत्य द्रव्यसामानाधिकरण्यप्रतीत्या गुणादेर्द्रव्यमात्रत्वमुच्यत इति न पूर्वा
परविरोधः। ननु न तादात्म्येन द्रव्याधीननिरूपणत्वं किंतु तद्रूपत्वे स्यात्तां शंक्याह च दृव्याद्यधीनेष्वि। ननु
तादात्म्येन प्रतीयमानत्वं चेद्धेतुरित्यत्र केक्यं भाष्ये ग्रहणमयोर्व्यक्तिचारशंका अत आह द्रव्यका

र्यत्वमात्रमिति। शंकत इति भूकूलघटवृत्तिशौक्ल्यवृत्तित्वात्सत्त्ववदित्यनुमानमभिप्रेत्य तदनुकूलत्वे
न सामानाधिकरण्यप्रतीतिर्नुक्ता तस्याः अन्यथासिद्धिं शंकत इत्यर्थः। अयुतसिद्धत्वसंबंधेऽपि भेदे सति
न सामानाधिकरण्यमुपपद्यत इत्याशंक्यायुतसिद्धत्वं निर्वक्ति यत्र हीति। आकारिणोः स्वतंत्रो। स्वतंत्र
वस्तुनोः सामानाधिकरण्यं न स्वतंत्रपरतंत्रयोः। द्रव्यतंत्रा गुणादय इति भेदेऽपि सामानाधिकरण्यमित्य
र्थः।। द्रव्याकारतया द्रव्यधर्मतया। आकारांतरायोगेन स्वातंत्र्यप्रयोजकधर्मयोगेनेत्यर्थः। एवं द्विमम
युतसिद्धिः सामानाधिकरण्योपपादिका सैव तु न भेदे घटते नहि भिन्नानां विंध्यहिमवदादीनां धर्मधर्मि
२६ भावउपलभ्यते। अयुतभिन्नानामप्यपृथग्देशत्वादिभिः प्रकारैर्द्धर्मधर्मिभाव उच्यते तर्हि तान् विकल्प्य २६
दूषयतीत्याह नामिमामिति। तदर्थविकल्पोऽपि तद्विकल्प इति तामित्युक्तः। एकदेशत्वमपृथग्देशत्वं भा
व्ये दूषितं स्वयं तु प्रकारांतरेणापृथग्देशत्वमाशंकते तत्र तावत्प्रतियोगिभूतं पृथग्देशत्वमाह यदि
तु संयोगिनोरिति। कुंडबदरे हि संयोगिनी ताभ्यामन्यः स्वस्वावयवरूपतयोर्देश इति। ननु परमाण्वो
श्च संयोगे कथं संबंधिभ्यामन्यदेशत्वं युतसिद्धिस्तेषामनाश्रितत्वादत आह नित्ययोस्त्विति। अविभुनो
द्वयोः विश्वविभुनोस्त्वन्यतरस्याविभुन इत्यर्थः। तथा चाकारो मत्र न यथासंख्यं। स त्वपीति। एक

तरस्यसंबंधिदेशत्वादेव नद्वयोः संबंधिभ्यामन्यदेशत्वमित्यर्थः। आत्मसंयोगीति। आत्माश्रितसंयोगे न
संयोगीत्यर्थः। तथा च न मूर्तत्वमुपाधिः स्याद्वात्मन्येव साध्याव्याप्तेस्तस्यात्माश्रितसंयोगेन संयोगित्वादमू
र्तत्वाच्च यथाश्रुते तु भवत्येवोपाधिः यत्रात्मसंयोगित्वं तत्रामूर्तत्वमिति व्याप्तेरिति। संगित्वात्। संयोगित्वा
दित्यर्थः। संबंधित्वमात्रस्य गुणादौ व्यभिचारात्। एतावानेव हेतुः सुखबोधार्थं तु मूर्तद्रव्यग्रहणं। यद्यप्या
काशात्मसंयोगे द्विविप्रतिपत्तिः तथापि न तस्य मूर्तसंयोगे साक्षीति अभ्युपेत्यापि वर्णितामयुतसिद्धयोर्जा
तरमाह पृथगाश्रयाश्रितत्वमित्यादिना। स्यादेतन्न तादात्म्यप्रत्ययोपपादकः समवायः किंतु सामानाधि
करण्यप्रत्ययविषय एवेति नेत्याह न च प्रत्यक्षरति। ननु शुक्लत्वमित्यादि तत्वतश्चादिति निष्कृष्टो गुणो
भिधीयते। शुक्लशब्दस्तु द्रव्यलक्षीन गुणवाची लक्षयति द्रव्यमतो लाक्षणिकं सामानाधिकरण्यं ततः कथं
द्रव्यगुणयोरभेदप्रतिभानमत आह न चेति। शाब्दो हि व्यवहारो लाक्षणिकः स्यात् न प्रत्यक्षप्रत्यय इत्य
र्थः। अभेदप्रत्ययस्य भ्रमत्वं भेदग्राहिप्रमाणाद्भवति तच्च लक्षणरूपमनुमानं। द्रव्यं गुणादिभ्यो भिद्यते,
समवायिकारणत्वादित्यादि तद्धर्मिग्राहकप्रत्यक्षविरोधाद्बाधासदृत्याह न चायमिति। तस्य भ्रांतित्वे सर्वो
लावप्रसंगादाश्रयासिद्धिः प्रमाणत्वे चाभेदविषयेण तेन विरोधादनुमानोत्थानासंभव इत्यर्थः। ननु संबंधि
न्यसति समवायो न भवतीति कथं तत्सत्तिर्हि समवायतत्त्वनिश्वासस्तेव कापेक्षवतिरस्तरथा तद्वैयर्थ्या

इतआह न च कारणसमवायादनन्येति। अन्येति वापाठः। तत्र न कारणसमवायादन्योत्पत्तिः किंतूत्पत्तिरेव
समवाय इति पूर्वपक्षिण एव ग्रंथः। एवं हि सतीत्यारभ्य सिद्धांतः। नित्यसमवायस्योत्पत्तित्वे कार्योत्पत्त्यर्थं
कारणवैयर्थ्यं चेत्तत्त्वं निरासोस्त तत्राह उत्पत्तौ वेति। अन्यसमवायादन्या कार्यस्योत्पत्तिनुत्पन्नस्य च स-
मवायस्तत्राह सिद्धयोस्त्विति। ननु सिद्धयोरपि संबंधिभ्यामन्यदेशत्वाभावादिक्तिरयुतसिद्धिः स्यादिति नेत्या-
ह न चान्येति। एतेनेति युतसिद्ध्यभावाद्यः संयोगाभावस्तदनवगमेनेत्यर्थः। पूर्वमप्राप्तिस्ततः संयोग
इत्यप्राप्तिसंयोगौ। एतेनेत्येतद्विवृणोति माभूदिति। एवं च युतसिद्धिव्यवस्थापनाद्धि कार्यकारणयोः सं-
२७ बंधस्य संयोगत्वव्यावृत्त्यर्थं तत्र कार्यस्य नित्यपारतंत्र्येणाप्राप्त्यभावेपि न प्राप्तेः संयोगत्वाभावो सिद्ध- २७
स्तत्र युतसिद्धिलक्षणे संयोगपदं कार्यकारणसंबंधाव्यवच्छेदकत्वाद्व्यर्थमित्यर्थः। अथ कार्यकारण
संबंधाद्व्यावृत्ते त्वेनोक्तयवादिसंमतधर्मापाचावकेन पदद्वंद्वेन युतं लक्षणांतरद्वयोरन्यतरस्य वा पृथग्गा-
तिमत्त्वमित्याद्यग्निथीयेतत्राह तत्रेति। अस्याः प्राप्तेः कार्यकारणसंबंधस्यासंयोगत्वसिद्धौ तद्व्यावृत्तिसम-
र्थसंयोगपदवद्युतसिद्धिलक्षणस्यासिद्धिस्तत्सिद्धौ च तल्लक्षितयुतसिद्धिराहित्येन कार्यकारणसंबंधस्यासं-
योगत्वसिद्धिरितीतरेतराश्रयं। तत्त्वमेवास्त नेत्याह न चान्येति। अन्यासंभवो असिद्ध इति शंकते यद्युच्येतेति।
अप्राप्तिपूर्विका प्राप्तिरन्यतरकर्मजा प्राप्तिनुभयकर्मजा प्राप्तिरिति त्रीणि लक्षणानि। एतानि च कार्यकारण

संबंधस्य नञर्थत्वं नीति नेतरेतराश्रयमित्यर्थः। वैशेषिकैर्हि तंतुभ्यः पट उत्पन्नेन तत्क्षण एव तंत्वाकाशसंयो
गजन्यः पटाकाशसंयोग इष्यते स चान कर्मजस्तत: प्राक् पटस्य तत्क्षणे पटे कर्माभावात् तत्र यथोक्तल
क्षणं तत्राव्यापकं स्यादित्याह संयोगज इति। नन्वेवं प्राप्तिपूर्विका प्राप्तिरित्येतावल्लक्षणमस्तु तथा च नाव्या
प्तिर्नापीतरेतराश्रयत्वं संयोगपदानुपादानादिति तत्राह न चाप्राप्तीति। अतिव्याप्तिं च लक्षणस्याह कार्यस्य चेति।
असति प्राप्तिप्रागभावानुपपत्ते: कार्यस्य तोत्तरक्षणे प्राप्तिरिति क्षणमात्रम् प्राप्तिरस्तीत्यर्थः। ननु निरवयवसावयवयो
समवायसंभवात्कथं संश्लेषानुपपत्तिरत आह संग्रह इति। एकाकर्षणे इतराकर्षणं हि सावयवानां कुशातनु
शाखादीनां दृश्यत इत्यर्थः। न हि तत्र पिंडावयववर्ति। पुष्पास्संवेष्टनेन पिंडीकृते पटे प्रसारणसमये तदवयवसं
योगा न नश्यंति किंत्ववस्थितसंयोगानामेव तेषामाधिकदेशव्याप्त्या पिंडावस्थानश्यति न त्वापिष्टस्यापीति। अ
त्रिमतफलछदाने स्वकृते विश्वलोके वितृषिमजगुरवल्लद्वं उभेदेनदानं। गलदश्छिकुलजुष्टं त्वद्रुपुष्पेव जीर्यतु च्च
नयति जनतायां नात्रिरस्तीति नूनं॥५५॥ ७॥ समुदायेति। गुणानां च केषांचित्परमाणुपरिमाणादीनां। अभेदे हि का
र्यकारणयो: कार्यनाशेपि कारणरूपेण तिष्ठतीति न निरन्वयनाशः भेदे तु निरन्वय इति। ननु निमित्ताभावात् किं
कालसंघातारंभवादयोरनुपपत्त्यविशेषे कथं तरप्रयोगः तत्राह स्थिरेति। स्थिरपक्षे हि कारणस्य भूत्वा भावात्स्वजन
कत्वं युक्तं नेतरत्रेत्यर्थः। वादिवैचित्र्यादेव बहुप्रकार इति गृहीतभाष्यप्रतीकानुषंगः। बहुप्रकारत्वमेव द्व

र्पयति। केचिदिति। अत्र भवतां सौत्रांतिकादीनां। विप्रतिपत्तिः पुरुषापराधाद्भवति यथा स्थाणो वस्तुवशाद्द्वादश्या
क्रियायामत्र तु न प्रथमः स्तुके सर्वज्ञानामिति। नाद्वितीय इत्यत्र स्थितं तत्त्वस्येति। बोधी बुद्धस्तस्य सिद्धिं माप्ति
प्रायस्तद्विवरणग्रंथे। ळोकनाथानां बुद्धानां देशनाआगमः प्राण्याशिप्रायवशानुसारिण्यः शून्यताप्रतिपत्त्यु
पायैः क्षणिकसर्वास्तित्वादिभिर्ळौकिकश्रोतृसमुदायेपुनःपुनर्बहुधाविधीयंते। नेदमेवाह गंभीरेति। अगाधो गं
भीरस्तद्विपरीतउत्तानः स्थूलदृष्टियोग्यस्तद्रूपेण। कस्यचित्प्रदेशउभयळक्षणा। ज्ञानमात्रास्तित्ववाह्या
र्थास्तित्वळक्षणात त्प्रतिपादनीकिंन्नापि देशनाशून्यतैवोद्भयातळक्षणात तत्सर्वत्वाप्तिन्नेत्यर्थः। प्रत्ययवै
॥२८॥ चित्र्यादर्थोऽनुमेय इति सौत्रांतिकाः प्रत्यक्ष इति वैभाषिका अतो मतभेदः। नूपंतरत्वाधिविशिपाइतिशेषः। काप ॥२८॥
स्कंधत्वात्कार्यकारणसंहतत्वात्। असंहतानामिंद्रियसंबंधाद्बेस्यर्थः। अहमित्याकारमाळयविज्ञानं रूढियादिजन्यं
रूपादिविषयं च ज्ञानमेतद्द्वयं दंडायमानं प्रवाहापन्नं विज्ञानस्कंध इत्यर्थः। वेदनास्कंध इति भाष्योपादानं। या
प्रियेत्यादितद्व्याख्यानं। सविकल्पप्रत्ययरसनेनविज्ञानस्कंधोनिर्विकल्प इति भेदः। स्कंधपो द्विनितः। वर्णं तेनं
तूसंतान्वेति। अनुपळब्धिळिंगकमनुमानमाह तस्मादिति। यः कार्योत्पादः सतत्वनुगुणकारणमेळनाधीन इत्येकां
व्याप्तिमुक्त्वा द्वितीयामाह कार्यस्यादानुगुणंचेति। याकार्योत्पत्तिः साचेतनाधिष्ठितकारणेभ्योपेक्षवतीति व्याप्ता
सास्य व्यापकचेतनाऽनिमनेव तिष्ठते ता याकार्योत्पत्तिः साचेतनाधिष्ठितत्वविरुद्धानधिष्ठितेभ्यः परशाकिमतकार

णेभ्यो व्यावर्तमाना चेतनाधिष्ठितकारणवत्त्वे सिद्धान्त्यभिमते वतिष्ठते नो या कार्यसन्ततिः सा चेतनाधिष्ठितकारणे
ष्वपरनियामिसिद्धिरित्यर्थः। अत्र प्रयोगः विमतं चेतनप्रेर्यमचेतनत्वात्तन्तुवदिति। विनाशातीतत्वेने नित्यस्यापि
वासनायास्स्वयानिष्टत्वादित्यर्थः। व्यापारवदाश्रयो व्यापार इत्युक्ते तदाश्रितजातिस्तद्व्यापारत्वं स्यादिति तत्का
रणकरत्युक्ते एतावत्युक्ते कुम्भोपि कुम्भकारव्यापारः स्यात्तन्निवृत्तये व्यापारवदाश्रय इति। एवमुक्तेपि मृदाश्रितो
मृद्राश्च घटो मद्व्यापारः स्यात्तन्निवृत्तये तत्कार्यं प्रति हेतुरित्यपि द्रष्टव्यं। अस्त्वेवं व्यापारलक्षणं प्रकृते किं जातम्
तत्राह। न च समययोरिति। व्यापारव्यापारिणोरेककालत्वं भिन्नकालत्वं वा नाद्यः कारणत्वस्यानियतप्राक्सत्त्व
रूपत्वान्न द्वितीय आधाराधेयभावस्य संबंधस्यान्यतरस्मिन्नसत्यप्ययोगादित्यर्थः। अथ पदार्थः पूर्वं भूत्वा
स्वजन्यव्यापारसमयेपि तदाश्रयत्वेनानुवर्तेत तत्राह। तथा चेति। प्रत्ययोपनिबंधस्य संग्राहकं बुद्धसूत्रमु
दाहरति इदमिति। हेतुमन्यं प्रतिअयते गच्छतीति तरसहकारिनिर्मिळितो हेतुः प्रत्ययः। इदं कार्यं प्रत्ययस्य
कारणसमुदायमात्रस्य फलं न चेतनस्य कस्यचिदित्यर्थः। हेतूपनिबंधस्य संग्राहकं सूत्रमुदाहरति उत्पा
दाद्वेति। तथागतानां बुद्धानां मते धर्मिणां कार्याणां कारणानां च या धर्मता कार्यकारणभावरूपा सा उत्पादाद्वा
सास्रादनुत्पादाद्वा स्थिता। धत इति धर्मः कारणं। ध्रियत इति धर्मः कार्यं। यस्मिन्सति यदुत्पद्यते असति च नो
त्पद्यते तत्तस्य कारणं कार्यं च। न चेतनः कश्चित्कार्यसिद्धये पेक्षित इत्यर्थः। स्थितता धर्मतेत्येतत्स्पष्टत्वात्सू

कब्म
२

त्रकृद्विजजते। धर्मस्थितितेकार्यतामाह। कार्यस्य हि धर्मस्य कारणादनतिप्रसंगेन कालविशेषे स्थितिर्जन्मवृत्तिरिति।
स्वार्थिकस्तन् त्यपः। धर्मनियामकतेति कारणतामाह। धर्मस्य कारणस्य कार्यप्रतिनियामकतेत्यर्थः। नन्वेवं विध
मेव कार्यकारणत्वं न चेतनाद्दते सिद्ध्यतीत्याह प्रतीत्येति। कारणे सति तत्प्रतीत्य प्राप्य समुत्पादेनुलोमता अनुसारि
तायासैव धर्मता। सा चोत्पादाद् अनुत्पादाद्वा धर्माणां स्थिता न चेतनः कश्चिदुपलभ्यत इत्यर्थः। सूत्रद्वयं व्याचष्टे
ऽयं पुनरयमिति। हेतोरेकस्य कार्येणोपनिबंधः स्थूलः। प्रत्ययानां मिलितानां नानाकारणानां कार्येणोपनिबं
धस्तत्र्यालिहितः। हेतूपनिबंधे उदाहरणमुक्ता तत्र बाह्यस्येत्यादिसूत्रं योजयति असति बीज इत्यादिना। याव
२५॥ त्पुष्पफलोदाहरणं तावदसति पुष्पे फलं न भवतीत्यादिव्यतिरेको द्रष्टव्य इत्याह यावदसतीति। चेतन्यं बीजादी २५॥
नां वाभ्युपगम्य तर्किं वा न दृतिरिकस्य कस्यचिद्भोक्तुः प्रशासितुर्वा नाद्य इत्याह तत्र बीजस्येत्यादिना। यावत्पुष्प
स्येति पुष्पपर्यंतस्येत्यर्थः। फलेपि यावद्भवोयोज्यः। न द्वितीय इत्याह। सत्यपि चान्यस्मिन्निति। अंकुराद्युत्ते
चेतनया पारानुपलंभादित्यर्थः। न चासो नुमेय इत्यद्रन्य हेतोसति कार्यानुत्पादादर्शनादिति। प्रत्ययोपनिबंध
इत्यत्र प्रत्ययशब्द इणोर्थातोर्भावा। र्थीयाप्रत्ययांतस्य रूपं तत्थाच समुदितत्ववाचीत्याह अयमानानामि
ति। तत्रास्य हेतूपनिबंध उच्यत इति वाक्यशेषः। उदाहरणमाह यदिदमिति। अविद्यारूपाः प्रत्यमाभ्रांत
परत्यर्थः। तथा संस्कारा अथोत्तरत्र व्याख्यास्यमानाः। तदारभ्य यावज्जातिप्रत्ययं जातिरूपं कारणं याव

च जरामारणादिति। सर्व्वमाध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबंधे द्वादशाङ्गकरणमित्यर्थः। विज्ञानधातुं व्याचष्टे
यावदिति। वेदनादिनाम्नः शोकयादिरूपस्य हेतुरूपश्चाश्रयः शारीरं नामरूपं। तस्य सूक्ष्मावस्था कललबुद्बु
दादिका ऽत्र नामरूपं। स एवांकुररूपं शब्दादिविषयैः पंचभिर्विज्ञानैः कार्यैः संयुक्तं यो ऽभिनिर्वर्त्तयति। आस्रवत्वेनु
गच्छतीति दुर्त्तारमित्यास्रवः कर्म तत्सहितं समनंतरप्रत्ययरूपं मनोविज्ञानं च यो ऽभिनिर्वर्त्तयति स विज्ञान
धातुरित्यभिव्यज्यते तच्चालयविज्ञानमित्यर्थः। देहाकारपरिणतेषु धातुषु शिरःपाण्यादिमत्वेन पिंडसंज्ञा।
अत एवैकसंज्ञा एकैकस्मिन्नर्थाने नित्यसंज्ञा। सत्वसंज्ञा। प्राणिसंज्ञा पूर्यते गलतीति पुद्गलसंज्ञा। वृद्धि
ह्रासस संज्ञेत्यर्थः। वस्तुविषयेति। नालयत्वादिविशेषोऽपेक्ष्योऽपितु सामान्येन वस्तुविषयेत्यर्थः। नामरूपं व्याचष्टे विज्ञाना
दिति। विज्ञानाद्धेतोरभिनिर्वर्त्तत इति संबंधः। चत्वारः पृथिव्यादयो य उपादानकारणस्कंधाः प्रक्षेदास्तन्नामेत्युच्य
ते। विधेयापेक्षयैकवचनं। नामाश्रयत्वाच्च नामत्वं। तानि वेपादानान्युपादाय कारणत्वेन स्वीकृत्य रूपं सितादि
रूपवच्छरीरमभिनिर्वर्त्तते निष्पद्यत इत्यर्थः। ननु नामरूपयोर्द्वित्वात्कथमेकवचनमत आह तदैकध्यमिति। एक
धेत्यर्थः। एकाद्वोध्यमत्रन्यतरस्यामित्येकशब्दस्य धाप्रत्ययस्य ध्यमुत्रादेशो रूपमैकध्यमिति। कार्यकार
णएकीकृत्यैक्यनिर्देश इत्यर्थः। जातेरुपरिवक्ष्यमाणत्वादिह गर्भस्थं तदेहाभिधानमित्याह। शरीरस्यैवेति। ष
डायतनं व्याचष्टे नामरूपसंमिश्रितानीति। षट् पृथिव्यादिधातवश्च आयतनानि यस्य करणहृद्दस्य तत्तथा। उपक्लेशा

मदमानादयस्तु उपायादुःखादीनां। तेन व्याप्य गतैवं जातीयक शङ्कानिर्दिष्टा इत्यर्थः। उत्पादानुत्पादाभ्यां हेतुहेतु
मद्भावे समर्थिते तावन्मात्रानुवादेयं दृश्यते उत्पत्तिमात्रनिमित्तत्वादिति ततश्चासंगतिमाशंक्याह यममित्संधिरिति।
अंगीकृत्य हेतूपनिबंधस्य चेतनानपेक्षत्वात्प्रत्ययोपनिबंधस्य सावार्यत इत्यर्थः। चेतनमन्यमनपेक्ष्य स्वकार्यं नाम
णूनां चेतरेतरप्रत्ययत्वादितरेतरमिळित्वा कार्यसिद्धिरिति चेन्न अचेतनानां कार्योत्पत्तिमात्रे निमित्तत्वात्तत्सं
घातेत्वस्ति चेतनापेक्षेति सूत्रार्थः। हेतूपनिबंधस्करस्य चूपत एव परेषां न संभवतीत्युत्तरसूत्र एवोत्तरोत्पादेव पूर्व
निरोधेऽदिस्यत्र वक्ष्यत इति। ननु मिळितेभ्यः पृथिवीधात्वादिभ्यश्चेतनमंतरेण वांकुरोत्पत्तिरुत्कर्षादिदृष्टा हेत्वादो
३०॥ पि किं न स्यादित्यत आह बीजादिति। तत्रापीश्वरोऽस्तीति संहतेत्यर्थः। न च स्वतंत्रहेतुत्वे केवळव्यतिरेकापेक्षा। तथा ३०॥
सत्याद्यज्ञानस्य ज्ञानांतरजैः जन्यत्वसंळग्न ज्ञानदृष्टांते न भवद्धिर्नानुमीयते औत्क्यादिपरिणाममात्रजन्य
त्वसंभवादिति। संहतानां हेतुत्वे संहत्त्राणां व्यतिरिक्तं तत्र संघातस्याप्रयोजकत्वं ततश्च न संहतुरनुमानं
नमिति शंकते स्यादेतदित्यादिना। यद्यनपेक्षास्तर्हि कुसूळनिहित बीजादिभ्यः किमित्यंकुरो न जायते तत्राह
स्वक्षणप्राप्तावृति। अंकुरोत्पत्तेराद्यक्षणो बीजादीनामंत्यक्षणस्तं प्राप्ता एव कारणं न पूर्वं तथैव दर्शनादित्यर्थः।
ऐकैकरूपेन कार्यजननसमर्थानां किं संघातेन तत्राह तेषां त्विति। उपसर्पणं इतरेतरसमीपगमनं। तस्य प्रत्य
यः कारणं तदृशात्परस्परसन्निधानमप्रयोजकं जायत इत्यर्थः। एकस्मादेव कार्यसिद्धेः किमन्यैरिति वदन्नु प्रष्टव्यः।

किमेकस्मात्कार्यस्य निष्पन्नत्वादन्येषां मर्थतेतिउत्तजनयितव्ये कार्ये एकस्मात्कारणात्सिध्यतिनतत्कारणस्यका
रणांतरेष्वपेक्षतेति। नाद्य इत्याह कारणचक्रेति। नद्वितीय इत्याह नचैकोपीति। किंत्वित्यादिपूर्वोक्तिनिगमनं।
परस्परं संनिधानमुपादध्व येषांते तथा। यदि प्रत्येकं कार्यजनन सामर्थ्यं हेतूनां तर्हि प्रति कारणमेकैककार्यो
दयप्रसंग इत्याशंक्याह नचस्यमहिम्नेति। तत्रैव एकस्मिन्नेवेत्यर्थः। जीवेनत्वंकुरोजनयितव्यः कारणभेदाद्वि
जातीयकार्यजन्मकिंनस्यान्महीहेमभ्यामिवघटकटकौ तत्राह नचकारणभेदादिति। अस्मिन्मते येषां मिलितै
र्हेतुता तेषां निरपेक्षाणामपि सामग्रीतातद्देदेच विजातीयकार्योत्पादइति। इत्थं संघाताप्रयोजकत्वमुक्त्वा दूष
याइतितन्नेति। यद्यनपेक्षादंत्यक्षणात्कार्यजन्मतर्हि पांत्याइयोपि स्वकार्यजनने ऽनपेक्षाः स्युः ततः किंजा
तमतआह कुसूलस्थत्वाविशेषेपीति। कुसूलेत्यंकुरजननोपयोगिबीजसंतानिर्वर्तकोबीजक्षणः।
अन्ये न बीजक्षणाः संति तत्र कूसूलगतविमतबीजक्षणोंकुरोपजननोपयोगिबीजक्षणमनपेक्षो नजनयेत् कु
सूलस्थत्वात्तत्काल्लोद्भूतमक्षितबीजक्षणवदित्याशंक्य कुसूलस्थत्वाविशेषेपीत्युक्तं। अंकुरोपयोगिबीजसं
तानानंतः पातित्वमुपाधिरित्यर्थः। स्वकार्योपजननेरीतिअनंतरजन्यबीजजननइत्यर्थः। तस्मादाद्यक्षणा
दनंतरानंतरवर्तिनिउपर्युपरिवर्तिनोऽनपेक्षाः स्वस्वकार्यजननइत्यनुषंगः। नन्वनंतरपैक्षणपरंपरा वर्ति
र्भवतु कुतः कूसूलएवांकुरसिद्धिस्तत्राह येनहीति। अनपेक्षस्यदेशकालेदेष्यपेक्षाविरहसाम्यादित्यर्थः। नासं

काक्ष्म २

हतस्य सामग्रीत्वं संहतानां च न तत्वे त्यक्तेः प्रभृति संधिमविद्धानित्यर्थः। अविद्यादिभिः कारणसंघातस्य प
आक्षेपः स्यादत आह न व्यापनं नाद्य इत्याह तत्रेति। यत्कार्यं तदन्यथानुपपद्यमानं स्वकारणं नोत्थापयति
अन्यथानुपपद्यमानदशायां तस्यासत्त्वात्। किंतु यदि जनकं तर्हि स्वसामर्थ्येन सामर्थ्यं चाविद्यमानस्य नास्तीत्यर्थः॥
न केवलं संघातानुपपत्तिः किंतु संहतानां परस्परमुपकारः सोपि नेत्याह नापि चेति। क्वावस्थान्यकृतोपका
रस्य च किमेकक्षणवर्तित्वं मत जाते भावे उत्तरे क्षणे उपकारः नाद्य इत्याह अभावस्येति। योद्ये कस्मिन् क्षणे
उपकाराभावाद्धेतुभावमनश्नुवानः क्षणांतरे तत्कृतमुपकारमासाद्य हेतुतां प्रजाते तस्य स उपकारो ऽन्य
कृत इति नायत्ते ऽपरथा स तस्य स्वभावः किं न स्यात्तवतु मते पदार्थक्षणस्याभेद्यत्वाद्दृष्टेन उपकृतत्वानुपकृ ॥७०॥
॥७०॥ तत्वेन संभवतो ऽतश्चाभावस्योपकारानास्य दृष्टत्वं तथा च नोपकार्योपकारकभाव इत्यर्थः। द्वितीयं प्रत्याह कादा
क्षणे देनचेति। क्षणिकत्वव्याघातात् कालक्षणे देनापि नोपकार्योपकारकभाव इत्यर्थस्तेनेनान्वयः। भाष्ये अत्र
श्रयाश्रयिभूतेष्विति सेतदनुविशेषणं। चकारश्च भोक्तृषु सत्स्वित्युपरिष्टाद्वंधनीयः। आश्रयाश्रयिभूतेष्विति
त्यत्र च भावप्राधान्यमाश्रयाश्रयित्वभूतेष्वित्यर्थः। आश्रयाश्रयभूतेष्विति तु पाठे भोक्तृविशेषणं।
आशयश्चादृष्टमिति। उक्तमात्रिसंधिमविद्धानीति यदुक्तं तद्विवृणोति अरक्ततावदिति। अदृष्टात्संघातोत्पत्ति
व्यवस्थासिद्धेर्नोक्तदूषणानुपपत्तिमाशंक्याह संरवाद्धिवेति। भोक्तृभोगदृष्टत्वे हेतुमाह प्राप्तभोगो हीति।

भोक्तुः स्थितौ रैयां हेतुर्भोगार्थीति। अर्थितादृशायां भोगदशायां वानुवृत्तेः स्थैर्यमित्यर्थः। अस्य विवरणं भोगा
भासुकामइति। इतरथा हि भोगस्याभावे वृत्ती चेति भ्रमः स्यादिति। अन्यस्य भोगायान्यो न कश्मतर इत्यर्थः। न
नु संघातासिद्धौ कर्तृभावो वान्यो न भोक्तृभावः कर्तुर्हि हेतुता तत्राह भोक्तृभावेनेति। ननु निरुद्धस्यास्य भा
वग्रस्तता निरुध्यमानस्य कथमत आह नतावदिति। यथा त्वारंभकृतं तादृसं योगस्य नाशं अपः पदाद्
विध्यमानस्यैव विनस्य द्रवस्थता वैशेषिकैः स्वीकृता न तथा वैनाशिकैरित्यर्थः। ननु उभयोर्विनाशग्रस्ता वे
कोक्ते इत्यत्राह तस्मादिति। यद्विनाशग्रस्तत्वं तद्विरनिरुद्धत्वरूपं सतु निरुध्यमानत्वं वक्तव्यं। तदेवचिरनिरुद्ध
त्वरूपं सतु निरुद्धत्वं विवक्षितमित्यर्थः। कार्यकाले कारणस्यासत्त्वेपि पूर्वक्षणसत्त्वेन हेतुत्वं भावयोक्रमयु
क्तं मृद्दादीनां कार्येऽन्वीयमानानामुपादानत्वोपलंभादिति तत्राह कारणस्यैहीति। प्रापयेति। क्रियाज्ञानव्या
दृत्यर्थः। एषां पदार्थानां याभूतिरुत्पत्तिः सैव क्रियाकारकारकमिति चोच्यते। तदेव कारणमिति सामान्यं हि
केदृविकब्याधिष्ठानत्वेन कारणमित्यर्थः। ननु सादृश्यसिद्धौ तद्व्यादनुगतरूपसिद्धिस्तद्देवनास्य सत्यपि
सादृश्ये सादृश्यश्च मादतआह सर्वथेति। ननु वै सादृश्येपि तंतु भावेपट भावादुपादानोपादेय भावइत
शंकयाह नवेति। एकस्मिन्नु पदार्थक्षणे तद्भावभावस्याशक्यग्रहत्वादुपादानभावेपि प्रसंगादित्यर्थः। अन्य
जात्युपाधौ कारणत्वं तर्हि जातिरेव कारणं व्यक्तेयस्य द्रवस्थाः स्युः नान्याः अन्य कारणत्वस्यान्यश्रयोगा

कल्प २

त्र पावै तन्नेष्टमित्याह सामान्यस्य चेति। आश्चेत्यादि। दिशाद्यस्य वस्तुशब्दस्य च पर्यायत्वापादनेऽपि व
स्तुनो नित्यत्वापादनमिष्टमेव तथा च तत्समादनिरोधयोरभावादित्यर्थः। प्रतिज्ञोपरोधं माख्यातुं चतु
र्विधानित्यादि प्रतिज्ञातं वै द्वितीयं व्याख्यातुं दर्शयति नीलाभासस्येत्यादिना। तत्र तावच्चतुर्णां कारणानां प्रत्येक
स्मिं नीलप्रत्यये समुच्चयेन कारणत्वसिद्ध्यर्थं द्वारभेदं प्रदर्शयति। आलंबनं च तत् प्रत्ययः कारणं चेति तत्सं
कं। उदितस्य ज्ञानस्य रसादिसाधारण्ये प्राप्ते रूपानियामकं चक्षुरधिपतिः। लोके नियामकस्याधिपतित्वा
दिति रेवं चित्तानां ज्ञानानां चतुर्थ्यं तत्सन्निमुक्त्वा चैत्तानामपि दर्शयति एवमिति। सुखं ज्ञानं मनोजन्यत्वे
सत्यपरोक्षत्वात्संमतवदित्यर्थः। अपरोक्षत्वमदृष्टादिव्यावृत्त्यर्थं। एकविषयसामग्रीजत्वेन चित्तसंबंधो वा
॥७२॥ दुरुक्तत्वेन चैत्तशब्दार्थः। ननु कार्ये तानि कारणान्यत एव चित्ताभिन्नहेतुजत्वं। उत्तरक्षणोत्पत्तिकालपूर्व ७२
क्षणस्थितावपि नस्थायित्वं सिद्ध्यत्येकक्षणे पुनः नभसंभवादुत्तरक्षण। एकद्वितीयक्षणे भवत्विति सारां
कथा हेतूत्पत्तिरिति। नूनं तत्कर्त्रोर भेदोपगमादुत्तरभावक्षणतदुत्पत्ती आक्षिप्येते तथा च पूर्वक्षणस्योत्तरि
क्षणं यावद् वस्थितौ स्थायित्वमित्यर्थः। प्रतिशब्दः प्राप्तिलोपाद्यर्थः संख्याशब्दो बुद्धिवचन इति व्याख्येया
वेति। प्रतीपाविरोधिनी। नन्वेवं संताने नोनफलानारंभकत्वं यतोऽसत्त्वापत्तिर्न च फलारंभे संतानानुरुद्धे
दः नहि हेतुफलभावमात्रं संतानः किंतु सजातीयानां हेतुफलभावस्तत्र विशिष्टहेतु विजातीयक्षणोत्पत्तावपि

२

सजातीयहेतुफलभावरूपसंतानो तुल्यजातीयविषयत्वेन विषयाणां वा तुल्यजातीयत्वं किमपरजात्योत्प
रं जोऽस्मानाद्यश्चैत्र संतानेऽनुवर्तमान एवरूपत्वान्न संतानविरमे रसत्वानो इत्येसंतानोच्छेदप्रसंगादि
त्फलका द्वितीयपरस्याह कथंचिदिति। सतया जात्या तत्सानुरूप्यमस्तीति सोपपूर्ववसंतानोपरमे सति विशुद्धसंतानोद
येपि न संतानोच्छेदः स्यादित्यर्थः। संतानगोचरशैनि त्वेयौ भावगोचरौवेति विकल्प्याद्यं निरस्य द्वितीयं निरस्यति
नापि भावगोचरा विति। क्वाप्यगत निरन्वयनिरूपाख्यत्वपदयो हेतुहेतुमद्भावमाहयत इति। अपरिशिष्यमा
णरूपत्वं नाशस्यात आह यद्यद्वन्वयिरूपमिति। तत्सशिख्यात ख्यपतितस्यो दृविंदोर्दृश्यमानान्वयिरूपाभावमं
गीकृत्यानुमानाद्वन्वयः समर्थित इदानीं प्रत्यक्षेणानुवृत्तिमाह शंकितां विति। उदविंद्रा वुपलब्धव्यपतिते सिंधौ स
समुद्रेवतोयभावस्तोयत्वसामान्यं न भिद्यते। तस्मादुदविंदौ विनष्टेपि तस्य विंदोः सामान्यरूपेणानुवृत्तावस्त्यन्वय
इत्यंतरश्लोकस्यार्थः। मोक्षाप्तिहेतुत्वाद्भावनायामार्गत्वं। शब्दस्याकाशाश्रयत्वं परिशेषतः साधयति तथाही
ति। तस्य हि न तावद्द्रव्यादिभ्योऽन्यत्र प्रसंगः। प्रसक्तेच तेषु बहुस्वंतर्भावे सामान्यादित्रये तावदनंतर्भावमाह जातिम
त्वेनेति। त्रयाणां निःसामान्यरूपत्वादित्यर्थः। द्रव्यकर्मणोरनंतर्भावमाह गुणत्वेन शब्दस्याकाशाश्रयत्वसिद्धय.
इत्यस्पर्शेति। शब्दो गुणः। जातिमत्वेन सति वा ह्यैकेंद्रियग्राह्यत्वाद्रूपवदित्यर्थः। वायुः स्पर्शप्रत्यक्षत इति मते तस्मि
न्नव्यभिचारात्वाबाया स्पर्शत्वेति। दिग्गादिव्यावृत्त्यर्थं मिंद्रियग्राह्येति। द्वींद्रियग्राह्यद्रव्यवारणाये केति एके

द्विपर्याल्पगंथत्वादिज्ञानेरपाकरणाय ज्ञातिमत्वे सतीति। तथाविधा यस्मात्मसमुद्दासायवात्येस्मर्कं मिति।
सत्यप्येतस्मिन् अनुस्मरण इत्यर्थः। उपलक्षस्मर्तोरन्यत्वेपि स्मृतिरूपपत्स्यत इत्सन्वयः। अस्मिन् मते क्रिया
तिरिक्तकर्त्राज्ञानद्रुपलक्षिस्मृतीष्वेवोपलब्धृस्मर्तारौ। तयोर्भेदे चैक संततिगत्वेन कार्यकारणभावान्नानिष्टसंग
इत्यकं भवति। प्रत्यभिज्ञात्वेन समाज्ञातं। स्वयमकृज्ञातं। अहमद्राक्षीदिति यथा श्रूयते अपप्रयोगतास्यातां परि
हरति अहं स्मरामीति। पूर्वोत्तरक्षणद्वयग्रहणाभावेनेदं मिथ्याकारप्रत्ययोदपायोगात् द्रष्टृस्मर्त्रैकानुप
त्तिमाशंक्याह न तु तत्वत इति। क्षणिकांगवादी प्रष्टव्यः। तेनेदं सहदृशमितिप्रत्ययेतत्तेदं तावच्छिन्नानव्यौ तयोः सा
३३ दृश्यं च किं न भासंते भासंते वा भासमानानि वा किं ज्ञानस्याकारा उत तस्माद्भिन्नानि। यद्वा ज्ञानाकारत्वं तद्वा तत् ज्ञा
नं किमेकमुत नानेति नाद्य इत्याह स्यसंवेदनमिति। ज्ञानाकारत्वपक्षे एकस्य नानात्वं व्याहतमित्याह न चैकस्ये ३३
ति। ज्ञानभेदं निराचष्टे। न च तावदिति। एकज्ञानेनानापदार्थोल्लेखे त्वेति नानेत्यल्लेखो भवति न ज्ञानभेदे इत्यर्थः।
परिशेषात् ज्ञानाद्भिन्नोर्थोभ्युपेयस्तस्य च नानाकारत्वस्य रस्य तत्तेदं तास्य दस्यप शम शेः स्थायिन्यात्मनि सति जव
तीत्याह तस्मादिति। ननु नवयमर्थस्य ज्ञाने वभासमपजानीमहे येन प्रतीतिविरुद्धी माहि किंतु सोर्थः प्रतीतावा
रोपितो न बहिरस्ति न च प्रतीतितावन्मात्रः ततश्च न ज्ञानस्यैकस्यनानार्थाकारत्वप्रयुक्तो व्याघातो न च वाल्यार्था
भ्युपगमप्रसंग इति विकल्पप्रत्ययोपमित्यादिशंकायांन्योक्तमर्थमाविष्करोतियद्युच्यत इति। कल्पितोपि ज्ञानेर्था

कारस्तस्माद्भिन्नोऽभिन्नो वेति वक्तव्यं अनिर्वाच्यत्वानङ्गीकाराद्भिन्नत्वे ज्ञानान्तरवदङ्कम्बितः स्यात्तथा न ते नेती
दमिति सद्रूपमिति च प्रतिभासमानानामर्थानामेकज्ञानाभेदाभ्युपगमे परस्परमप्यभेदप्रसंगः। तथा चेतरेत
रभेदेन लौकिकप्रसिद्धाः पदार्थानि द्रूयेरन्। ज्ञानाद्वैतमस्य भेदः असिद्धः सोऽप्यपह्नुतः स्यात्। उमितिवदंतं प्रतिस्व
पक्षसाधनपरपक्षाक्षेपानुपपत्तिरुक्ता भाष्ये तां विशदयति एकाधिकरणेति। इदं नित्यमिदमनित्यमिति त्ति
न्नयो ज्ञानयोराकारौ तथा च धर्मिभेदेन व्यवस्थानाद्विवादो न स्यादित्यर्थः। ~~असति च लौकिकप्रसिद्धपदार्थे कि~~
वात्यालंबनत्व इत्येतद्विवृणोति ज्ञानाकारत्वे हीति। विषयत्वाभावादाश्रितत्वाभावात्। असति च लौकिकप्र
सिद्धपदार्थकत्व इत्यस्य विवरणं न वा लौकिकार्थेनेति। अनित्यः शब्दो यद्यलौकिकार्थस्तर्हि तेन विभुत्वमपि
वक्तुं शक्यं तथा नित्यत्वेन तस्य न विरोध इत्यर्थः। तिष्ठापयिषितास्थापयितुमिष्टता। एवं तावत्तत्तदृतास्पदादिर
थौ ज्ञानस्यान्तर आकार इति विज्ञानवादिमतं बाह्यार्थवादिदूषणमध्येऽपि प्रसंगाद्दोषांकप्रतिविक्षेपरद्धानी
आक्तिबाह्योऽर्थः स तु क्षणिको निर्विकल्पैकवकाश्रीति। सविकल्पप्रत्ययास्तु विकल्पास्त द्रुतसादृश्या ह्याकारे ण
निभासन्तेऽतो विप्रतिपत्त्यादिव्यवहारसिद्धिरिति बाह्यार्थवादमाश्रित्यैव शंकते यद्युच्येतेति। ननु स्वग्राहकस्य
ज्ञानस्य स्वयं ताव न ग्राह्यं कथमस्य बाह्याकारविषयत्वमत आह द्विविधो हीति। स्वाकारस्य निर्विकल्पक
स्यावसायात् अथितं पारे अवसेयोऽप्यवसेयः। अध्यवसेयस्य बाह्यार्थस्य निश्चितत्वादनिश्चितार्थतापाद

कंभाव्यमयुक्तमित्याशंक्याह। ह्यायमर्थसंधि रिति। स्वमेव ज्ञानं प्रतिभासो यस्य तत्तथा। अनर्थ इत्यत्र वाह्यार्थ इत्यर्थः।
तस्मिन् वाह्यात्मत्वाध्यवसायात् प्रवृत्तिर्दर्शनादि लौकिकस्येत्यर्थः। आंतरस्य ज्ञानस्याधिपस्य ज्ञानाकारस्य
तद्विपरीतबाह्याकाररूपेण ध्यवसायो नाम। किंतु इ रूपेण निष्पादनमुत तेनैव संवेदनं। किं वा तेनाकारेणारोपण
मिति विकल्पार्थः। आंतरं वाह्येन सह योजयितुं चने शत इति योजना। गृह्यमाणे वाह्ये ज्ञानाकारस्यांतरस्यारो
प इति पक्षे ऽपि ज्ञानस्य वाह्यस्य केन ग्रहणं। किं यस्याकार आरोप्यते तेनैव सविकल्पकप्रत्ययेनोन तत्समसम
३४ भुवा निर्विकल्पकेन। प्रथमे किं वाह्यमात्रमितं यत्रारोपः स्वलक्षणं वा ऽथो सामान्यं वा। नाद्य इत्याह न तावद्विकल्प ॥३४
इति। विकल्पः सविकल्पकप्रत्ययस्तावदभिलापसंसर्गयोग्य वस्तुगोचरः। अभिलापस्य च शब्दस्य सामान्ये
नैव सहसमयः शक्यो ग्रहीतुं न स्वलक्षणे न। तस्य देशकालाननुगतत्वेनानंत्यात्तत्र संगतिग्रहायोगात्। अतः
शब्दोल्लेखिना सविकल्पकप्रत्ययस्य न स्वलक्षणविषयत्वमित्यर्थः। सुखादीनां क्षणिकभावानामन्य
रूपमशक्यैक्यसमयः यतो ऽनन्यभागन्याननुगतो हि सः। अतस्तेषां स्वसंवित्तिरसाधारणाकारविषया वि
त्तिरभिजल्पानुषंगिणी न भवति किंतु निर्विकल्पिकैवेति श्लोकार्थः। एतेन सामान्यात्मकबाह्यस्य सवि
कल्पकबोधेन ग्रहणमपास्तं व्यक्तिमगृहीत्वा तद्ग्रहणायोगात् अयुक्तेश्चोक्तमार्गेण शक्यग्रहत्वादिति। द्वितीयं
निषेधति नचेति। विकल्पेनागृहीते वाह्ये विकल्पे समसमयेन निर्विकल्पकेनागृहीते विकल्पः स्याका

रमारोपयितुं नार्हतीत्यर्थः । आद्ये द्वितीयं निषेधति अगृह्यमाणे त्विति । अधिष्ठानाग्रहण आरोप्यमात्रं प्र
तीयेत नारोपविषय इत्यर्थः । एवं तावदधिष्ठानप्रतिभासासंभवात् बाह्ये ज्ञानस्वरूपस्यारोपः प्रतिक्षिप्त इदानीं
मारोप्यस्फुरणायोगाच्च समारोप इत्याह तथापीति । स्वसंवेदनं संतमपि कथं यदा बाह्यं बाह्यत्वेनारोपयति तदा
किं स्वसंवेदनं स्वाकारं गृहीत्वा पश्चादारोपयतीति योजना । युगपत्स्वाकारस्य ग्रहणं बाह्यत्वेनारोपणमिति
पक्षे किं स्वाकारबाह्ययोरैक्यस्फुरणमारोपः उताख्यातिमत इव विवेकाग्रहमात्रं नाद्य इत्याह स्वाकारो हीति ।
स्वप्रकाशत्वपरप्रकाशत्वाभ्यां भेदावभासान्नैक्यस्फुरणसंभव इत्यर्थः । अन्यदेव स्यात् सिद्धं चेत्यर्थे तेस
र्थः । न तु स्वाकारः समारोपित इति । यः स्वाकारः स समारोपितात्मको न तु स्यादित्यनुषंगः न स्फुरेदित्येवार्थः ।
द्वितीये किं बाह्ये गृह्यमाणे विवेकाग्रहो मृषाव्यवहारं प्रसूते । अगृह्यमाणे वा नाद्य इत्याह न चेति । न द्वि
तीय इत्याह तथापीवेति । अपि च कारः समुच्चयार्थ एतदुपपत्तिसाहित्यं प्राप्यः वाक्ये । एवं तावदस्कसंत
मित्यारभ्य परमार्थज्ञानाकारस्य बाह्यवस्त्वात्मना समारोपः प्रतिक्षिप्त इदानीं वासनापरिप्रापितस्य क
ल्पितज्ञानाकारस्य बाह्यसमारोपपक्षं करोति एते नेति । तस्यापि स्वप्रकाशज्ञानमच्छेन बाह्या द्दृग्रह
स्वासमत्वादित्यर्थः । पाशुपतस्य हि तपश्चिन आत्मज्ञानाय विङ्कं कुर्वतः प्रमाणकुशलैस्तैरयुपहासा
दात्मस्वप्रकाशत्वमवगतं । बौद्धैरभावस्यार्थक्रियाकारित्वानभ्युपगमात् तथ्यमभावाद्भावोत्पत्तिरेवास्ति

हांतत्वेनानूद्य निरस्यते तत्राहास्थिरादिति। आपाद्यानुवादो यमिति वादिप्यनू क्षणिकस्य कारणत्वास
भवमाह उक्तमेतदित्यादिना। क्षणिकं कारणमिति च इन्प्रष्टव्यः तत्किमनपेक्षं सापेक्षं वेति नाद्य इतरेतर
प्रत्ययत्वादिति सूत्रविवरणावसरे यद्यंत्यक्षणप्राप्ता अनपेक्षा इत्यादिग्रंथेन निरस्तत्वादित्यर्थः। द्विती
योपि तत्सूत्रव्याख्यानसमय एवन च क्षणिकपक्ष उपकार्योपकारकभावोस्तीत्यादिना ग्रंथेन प्रकृतः। तत्सू
त्रोक्तं निरासप्रकारमनुवदति निरपेक्षादिति सापेक्षतायां वेति। सापेक्षतायां वा क्षणिकत्वप्रसंग इत्यन्व
७५ यः। क्षणिकोपि सापेक्ष इति वदन्प्रष्टव्यः। स किमन्यकृतोपकारस्याश्रयो न वेति। आद्यस्य निरसनं अप
स्येति। पूर्वमनुपकृतस्य पश्चादुपकारसंबंधेत्युपकृतत्वं स्नातुं शक्यं इतरथोपकारसंख्या क्षणिक २१
त्वसंभवेनान्यकृतत्वासिद्धेरित्यर्थः। द्वितीयं प्रत्याह अनुपकारिणि वेति। ततश्चोपकृतत्वज्ञानात् क्ष ॥७५॥
णिकस्य स्थापित्वं वस्तुनो मंतव्यमित्यर्थः। अभवति। यदि क्षणिकस्य नोपकृतत्वं संभवति अनुपकृतस्य
न सापेक्षत्वं निरपेक्षस्य च कारणत्वमतिप्रसंगि तर्हि क्षणिको न सापेक्षो नापि निरपेक्षः किंतु प्रकारांतर
योगीत्याशंक्याह सापेक्षत्वानपेक्षत्वयोश्चेति। कूटस्थस्यापि नियतशक्तिकत्वाद्व्याप्य सर्वतः सर्वोत्पत्ति
प्रसंगानुपपत्तिमाशंक्य सर्वतः सर्वावस्थात् तज्जन्यस्य सर्वोत्पत्तिरिति कार्ययौगपद्यापात्रिपरतया व्याचष्टे अय

मणिसंधिरिति। अन्यकृतोपकारस्य भावाद्भेदे सत्युपकारशब्देन भावरूपमेवाभिहितं स्यात् तस्य चान्य
कृतत्वे कौटस्थ्यं स्यादित्यर्थः। धर्मोपमश्चेत्स्थिरः कारणत्वाभिमतः पदार्थ उपकाराश्रयश्चेदित्यर्थः। उप
काराद्भेदे भावस्य स भावोऽनित्यः भेदे स उपकारोऽनित्यः। स एव च कारणं भाव इत्यर्थः। उपकारानाश्रयत्वे दू
षणमसत्कल्प इति। यदुक्तमन्वयव्यतिरेकाभ्यामुपकारस्य कार्यकारीनभाव इति तत्राह न चैतावतेति। परमार्था
श्रितत्वात्कार्यकल्पनायाभाव उपादानं तद्धर्मस्य निर्वाच्य उपकारः कार्योपयोगीत्यर्थः। कृतोऽमुं दृष्टं तस्य सत्यत्वा
भिधानात् दार्ष्टान्तिकस्य मूल कारणस्य सत्यत्वमुक्तं। भेदाभेदाभ्यामनिर्वाच्येनोपकारेणोपकृतं कारणं कार्य
मनिर्वाच्यं करोतीत्युक्तं। तदयुक्तं भेदनिषेधेऽभेदापत्तेरभेदनिषेधे च भेदप्रसंगादित्याशंक्य बौद्ध प्रतिप्रतिवं
दीमाह अपि च येपीति। किंच तयोरेव कार्यकारणभावः सामान्ययोर्न तदुपहितव्यक्त्योर्वा न प्रथमोऽतिप्रसं
गादित्यभिधाय द्वितीये सामान्ये वस्तुनी अवस्तुनी वानाद्योऽपराद्धान्तादित्याह न च बीजांकुरत्वे इति। अ
वस्तुनोरेव सामान्ययोः कार्यकारणभावो व्यर्थक्रियाकारिणः सत्त्वाभ्युपगमादपराद्धान्तावह एव।
अवस्तुसामान्योपहितानां व्यक्तीनां कार्यकारणत्वाभ्युपगमे तदुपकारकार्ययोरपि अवस्तुत्वसंभवे
सिद्धिरित्याह तस्मादिति। काल्पनिकात् काल्पनिकसामान्योपहितादित्यर्थः। यदि सामान्योपधानं म

तदेणवाह्निनामेव कार्यकार्यकारणभावस्तत्र दोषांतरमाहान्यथेति। अनुमानं हि सामान्योपाधौ प्रवर्त्ते
तेयत्कीनामानं सेन व्याप्तिग्रहणप्रयोगादित्यर्थः पद्ध। नाभावः रूपादि रहितब्रह्मजगदुपादानत्व वा
दि समन्वयस्य विज्ञानं नीलाद्याकारमित्यनुमानविरोधात् विरोधसंदेहे हेतुपूर्वोक्तस्समुदायप्रास्यादिदू
षणानुपजीव्य वाह्यार्थपक्षाद्रूपाद्रे तु हेतुमष्टुक्तणांसंगतिमाहेत्यर्थः। माद्यातेन पूर्वपक्षानु
त्थानमाशंकते येति। नो द्युप्रारंभार्थोयशद्वः। वस्तुव्यवस्थित्यै प्रमाणाद्यभ्युपगम्य तन्निषेधे व्याघा
तरत्यर्थः। वुद्धिपरिकल्पितेनेति। विभागमात्रं तेषाद्याकाराणां परिकल्पितं। तेषादि रूपत्वं तु वुद्धे वास्तव
३६। मेवानतु नीलाद्याकारं विनामित्यनुमानेवेदान्तिनां सिद्धसाधनं ब्रह्मणो विज्ञानात्मकस्य नीलाद्यात्मकत्वा ।३६।
त् इतरथा तदुद्देतासिद्धेरत आहेवंचेति। वोद्धा हि विते विज्ञानस्यान्तरं नीलादिरूपमावक्षते नवयमित्यर्थः।
वुद्ध्युपरिकल्पितं तेषादि विभागमुपपादयति तथा हीति। असत्याकरेति। आकारस्यासत्यत्वं वाह्यरूपेणास
त्येनान्तररूपेणसत्येनाकारेण युक्तमित्यर्थः। ननु वाह्यार्थसत्यत्वे प्रमाणादयः सत्याः सिद्ध्यंतिकिं कल्पितत्वे
नेत्याशंक्य तस्मिन्नपि प्रमेयविभागः सत्योपलब्ध्येतापि प्रमाणफलविभागस्तावन्मिथ्या तथा वार्थान्। प्रमेयमिथ्या
त्वमापत्स्यतइत्यभिप्रेत्याहवाह्यवादिनोरपीति। वैभाषिकमते प्रमाणफलविभागस्य कल्पितत्वमुपपाद
यति भिन्नाधिकरणत्वे हीति। प्रमाणं हि करणं प्रमितिः फलं। तयो र्भिन्नाधिकरणत्वे करणफलभावो न स्यात्।।

करणफलभावस्यैकाधिकरणयोरेवेत्यर्थः। तत्र दृष्टान्तमाह नहीति। यद्यपि परशुः स्वावयवेषु समवेतो द्वैधी
भावस्तु खदिरे तथापि व्यापारावेशः करणीभूतः परशुः संयोगेन खदिराधिकरण इति करणफलयोरेका
धिकरण्यं। एवं तु प्रमाणफलयोरेकाधिकरणता। तावता कथं तद्विभागस्य कल्पितत्वसिद्धिरित आह कथं चे
ति। यदि ज्ञानस्थे एव प्रमाणफले भवतस्तथैव तदैकाधिकरण्यं भवति इतरथा कथं भवतीत्यर्थः। ननु भवेतां
ज्ञाने प्रमाणफलयोरवस्थानसंभवः ज्ञानस्थे एव प्रमाणफले ततो वा किं जातमत आह न च ज्ञानस्वलक्ष
णमिति। न तावत्कुण्डे बदरवत् ज्ञाने प्रमाणफलयोरवस्थानसंभवः ज्ञानस्यासंयोगित्वात् तादात्म्येन स्यादवस्था
नं न च वस्तुतो भिन्नाभ्यामेकस्यैक्योपपत्तिरतः काल्पनिकः प्रमाणफलभेद इत्यर्थः। तमेव दर्शयति। तदेवे
ति। अज्ञानव्यावृत्त्यात्मकापोहरूपेण कल्पितो ज्ञानत्वसामान्यरूपोंऽशो यस्य तत्तथोक्तं। अशक्तिव्यावृत्तिरू
पेण कल्पिता। विज्ञानस्यात्मानं स्वमनात्मानमर्थं प्रतिबिंब्याप्रकाशनशक्तिः सोंऽशो यस्य तद्विज्ञानं तथा। तच्च
प्रमाणमित्यर्थः। वैभाषिकस्य बाह्योऽर्थः प्रत्यक्षः सौत्रान्तिकस्य ज्ञानगताकारवैचित्र्येणानुमेयस्तन्मतेपि प्रमा
णफलविभागस्य कल्पितत्वमाह। एवमिति ज्ञानगतं बाह्यनीलसारूप्यं भासमानमनीलाकारापोहरूपेण
कल्पितं तच्च बाह्यमर्थं व्यवस्थापयति। प्रतिबिंबमिव बिंबं अतः प्रमाणं। ज्ञानात्मकाशाद्यन्यतद्व्यावृत्तिरूपे
ण कल्पितं ज्ञानत्वसामान्यं फलं तादृक्सारूप्यबलान्नीलज्ञानत्वेन व्यवस्थाप्यते। अस्मिन्नपि मते प्रमेयं

परमार्थेकिन्नमिति। सारूप्यस्य ज्ञानज्ञेयभावव्यवस्थापकत्वे सौत्रांतिकवचनमाह तथा चेति। वित्तिसत्तैव त
द्वेदना तस्यार्थस्य वेदना नयुक्ता कुतस्तस्या वित्तिसत्तायाः सर्वत्रार्थे विशेषाभावात्। ज्ञानमात्रं हि सर्वज्ञेय
साधारणं तस्मात्तां तु वित्तिं सारूप्यमाविशत् घटयेत् किं घटयेदित्यत आह सरूपयत्तदिति। तद्ग्राह्यं वस्तु सरू
पयत् स्वेन सरूपां वित्तिं कुर्वत् घटयेदित्या सह विषयभावेन योजयेदित्यर्थः। सरूपयंतमिति तु पाठे अर्थमि
ति शेषः। एवं संभाविते पूर्वपक्षे साधकप्रमाणानि कथयतीत्याह प्रश्नपूर्वकमिति। स्तंभाद्यर्थः किं परमाणव
॥३७॥ स्तत्कृतोऽवयवी वा प्रथमे किं परमाणुमात्रस्तद्गोचरप्रतीतिविशेषकृतो वा। तत्र परमाणुमात्रत्वं निषेधति
स हीति। भासमानादन्यगोचरत्वमात्रमतिप्रसंगः। अथ द्वितीयं द्विधा विकल्प्य दूषयति। न चेति। प्रतिभासन ॥३८॥
काले तदुपाधिं कृत्वा अर्थस्य धर्म इत्यर्थः। स्वांशः स्वाकारः। ग्रहेनेकस्येति। अनेकस्य परमाणोरेकेन ज्ञानेन ग्र
हे हि किंचित्स्थूलं रूपं गृह्यते तच्चासीदतं तस्य विवरणं प्रतिभासस्थमिति। दिशाकालभिन्नपरमाणुत्वाच्छादक
त्वात्संवृतिर्बुद्धिः। स्वाभाविकत्वाभावे हेतुमाह एकात्मनीति। एकपरमाण्वात्मनि। औपाधिकविषयत्वे स्थूलबु
द्धेर्भ्रांतित्वमाशंक्य द्वितीयपक्षं केनपारिह्रियते नचेति। तस्य स्थूलस्य दर्शनं न च भ्रांतं यतः कारणान्नानाव
स्तूनां परमाणूनां ग्रहणात्सकाशात्सां कृतस्य स्थूलस्य ग्रहणमन्यन्न भवति य एव हि भिन्नर्थीगृहीताः ते नैव
निरंतराः परमाणव एकधियागृह्यमाणाः स्थूलमिति भासंते तेनेवं चेत्स्त्रेव वस्तुग्रहणं न भ्रम इत्यर्थः। एवं स्थू

ळनीळावभासस्य प्रमाळंबनत्वं बाह्यार्थवादिना समर्थितं विज्ञानवादी दूषयति तन्नेति। यदि निरंतरा नीळ
परमाणव एकधीगोचरा नीळं तर्हि नैरंतर्यमसिद्धं। नीळपदार्थे चरसगंधस्पर्शपरमाणूनामपि सत्वेन रूप
परमाणूनां नैरंतर्याभावादित्यर्थः। आरात् दूरे ध्वनं विनिविडं तदेव वनं। ननु स्थूळप्रत्ययस्य न भ्रांतत्वं
युक्तं स्थूळक्षणविषयत्वे न निर्विकल्पकत्वात्स विकल्पकं त्ववस्तुभूतसामान्यविषयत्वाद्भ्रांतमित्याशंक्या
ह न स्यादिति। कल्पनाऽभिळापः तद्योग्यं तद्रहितं यद्यपि स्थूळव्यक्तिज्ञानं व्यक्तौ संबंधग्रहणाभावेन श
ब्दवाच्यत्वाभावस्तथापि भ्रांतत्वान्नास्य प्रत्यक्षता कल्पनापोढमभ्रांतमिति प्रत्यक्षळक्षणकरणादित्यर्थः।
आद्यविकल्पयोर्द्वितीयं निराकरोति। नापि तत्समूहारति। परमाणुभ्यस्तंभादीनां भेदे संबंधोऽस्ति न वा यदि न।
न तर्ह्युपादानोपादेयभावः अस्ति चेत्तर्हि संबंधस्तादात्म्यं समवायो वा नाद्यो व्याघातान्न द्वितीयो वैशेषिका
धिकरणे हि भिन्नयोस्समवायो निरस्त इत्यर्थः। भाष्यकारेण ज्ञाने भासमानस्तंभाद्याकारवैचित्र्यान्यथानुप
पत्त्या स्तंभादेर्ज्ञानाकारत्वमुक्तं तद्युक्तं भिन्नस्यैवार्थस्य ज्ञानेन प्रकाशसंभवादित्याशंक्याभेदाभ्युपगमेऽर्थ
स्यापरोक्षता न स्यादित्याह न तावदित्यादिना। मा भूत् ज्ञानमर्थविषयं ज्ञानांतरस्य जनकं मा च विषयाश्रित
प्राकट्यमनेन जनि तथापि स्वभावसंबंधादर्थविषयव्यवहारं जनयेदित्याशंक्याह तन्नेति। ज्ञानमात्राकारस्य
सर्वज्ञेयसाधारण्यान्नीळाकारवत् ज्ञानं नीळव्यवहारहेतुरित्यर्थः। विज्ञानवादी सौत्रांतिकस्यापि संमत

मितिवदंस्तदुक्तिमाह तदुक्तमिति। ननु न सौत्रांतिकेन ज्ञानस्यैव नीलमाकार इष्यते किंतु बाह्यस्य नीलस
दृशो ज्ञानस्य नीलाकारोस्तीति तत्कथमर्थस्य ज्ञानाकारत्वसम्मतिरत आह एकस्येति। स्वीकृते ज्ञाननिष्ठ
नीलाकारे तेनैव व्यवहारोपपत्तेर्न बाह्यसिद्धिरित्यर्थः। एवं प्रत्यक्षेण ज्ञानाभेदमर्थस्य समर्थ्यानुमाना
दपि समर्थयते यद्येनेत्यादिना विज्ञानवादिना यो ज्ञानार्थयोर्भेदो निषिध्यते तद्व्यापकस्य सहोपलंभा
नियमाभावस्य विरुद्धो यः सहोपलंभानियमस्तदुपलब्धिस्तत्र व्यापकाभावे व्याप्यभेदाभाव इति। व्याप
कविरुद्धोपलब्धिं प्रपंचयति निषेध्यो हीति। अश्विनीनक्षत्रे। यो यन्मात्रानुबंधी यद्भावमात्रानस तत्स्वभाव
॥३८॥ हेतुः। उक्तं हि। तद्भावमात्रान्वयिनि स्वभावो हेतुरात्मनीति। तद्भावं प्रकृते दर्शयति। बाह्यानालंबनता हीति। प्र ॥३८॥
त्ययत्वमात्रानुबंधिनीति। तद्भावे सपि दृष्टत्वं। निरालंबनत्वस्याभावस्य प्रत्ययरूपभावात्मकत्वादुक्तं
हि नत्वन्यासंसर्गिणो भावादन्योऽभाव इति। एवं तावत्प्रत्यक्षेण नीलाकारः स्वीकृतश्चेत्तेनैव व्यवहारसिद्धे बाह्या
र्थवैयर्थ्यमुक्तं। तत्र प्रत्ययगतार्थाकारज्ञानमेव बाह्यार्थं कल्पयतीति प्रत्यवतिष्ठते इत्याह सौत्रांतिकरति।
बाह्यार्थसद्भावेनुमानमाह येयस्मिन्निति। सौत्रांतिकः स्वात्मसंतानमेव दृष्टांतयति। यन्येति। अविवक्ष
ति विवक्षामकुर्वति। अजिगमिषति गंतुमनिच्छति मापि विवक्षु जिगमिषु पुरुषांतरसंतानाश्रितगमनवचन
विषयप्रतिभासा यथा मापि सति कादाचित्काम ध्वतिरिक्तं पुरुषांतरसंतानमपेक्षंते तथा द्वार्ष्टांतिकेपी

स्याहेतथा चेति। अहमित्युल्लिख्यमानालयविज्ञानेन जन्यमानास्तदतिरिक्तजन्यत्वाजन्यत्वाभ्यां विवादाध्या
सिताः शब्दस्पर्शरूपरसगंधसुखादिविषयाः षडप्यर्थविषयप्रवृत्तिहेतुत्वात्प्रवृत्तिप्रत्ययाः सत्यालयवि
ज्ञानसंतानेकदाचिद्भवंतस्तद्व्यतिरिक्तहेतुका इत्यर्थः। अर्थांतरतामाशंक्याह यश्चेति। अन्यस्यासंभवादित्यत्र ॥
असंभवोऽसिद्ध इति शंकते। वासनेति। शंकाग्रंथो क्रमेणार्थव्याख्यानपूर्वकं दूषयति। नन्विति। तत्प्रवृत्तीति
त्याजीवस्थीरिहतुत्र लप्पउत्पत्यामुखतएवेतिसाक्षात् दृष्टं दुर्ग्रहणं भाष्ये भोक्त्रर्थत्वाद्भोग्यजातस्य जीवत्ता
नात्सर्वज्ञतानोपचाररतिजीवपक्षस्योपष्टंहणाभासोऽदृष्टमित्यादिभिः सर्वज्ञतानोपपादनादुपचारापोगा
दित्यर्थः। सिद्धांतभाष्यंगतार्थत्ववर्णनच्छलेन विवृतमित्यभिप्रेत्याह। सिद्धांतस्त्विति। लिंगत्रयसमाधिंश्लो
कोक्तं दर्शयति तद्देवमित्यादिना। पूर्वपक्षमाशंक्याचार्यदेशीयैर्जितद्रूपेण वद्धिरूपेण निरूपणं येषां ते तथा
अस्यांतमभेदे ब्रह्मभवत्परस्परमव्यावृत्तिप्रसंगात् ब्रह्मव्यतिरिक्ते जीवाभावे च तस्यैवोपदेशः स्यात्तस्य
चपूर्वकत्वादित्यर्थः। परमात्मनिदर्शयितव्ये भोविशेषाणामनोपक्रमः सनतयोरभेदमादायसंचाभेदः प्रति
२८५। ज्ञातिहृष्टः इति योजना। आश्मरथ्यमताद्भिन्नतिजीवो हीति। उपाधिसंपर्को हेतुः कालुष्येन जीवपरभे
दे। स एष हेत्वनादिकालो भेदहेतोर्गमकस्य संसारित्वादेरीश्वरविरुद्धधर्मस्येत्यर्थः। दृष्टं वैशेषिक दृष्टान्त
ना अणुरूपामनोत्हृष्टतापव्याननद्यः स्यंदमानाः समुद्रेऽस्तंगच्छंतिनामरूपे विहाय इत्युदाहृतं व्यंतद्वितथावि
ज्ञानिनिः स्यस्य पूर्वोहृअर्थसाम्यात्नुपपन्नमोऽस्येमानद्यः स्यंदमानाः समुद्रं प्राप्यास्तंगच्छंतीत्युदाहरतुअ
नेनजीवेनात्मनेति सामानाधिकरण्यं कार्यकारणभावेन भेदाभेदपरमितिशंकितेपरिहरति। न चैते आरति
आश्मरथ्यमते कार्यकारणभावस्य वास्तवत्वेनन्यूनत्वात्किपानपीतिभाष्यनिर्देशायोगमाशंक्याह।

मात्मैवाभूत्तत्केन विजानीयादिति। वाक्यं विदृष्णोत्थानं द्वैतविषयाभावेप्यात्मभूतं ब्रह्म जानीयादिति
त्रांकापनुत्तये विज्ञातारमरे केन नाविजानीयादिति वाक्यं न द्यान्वष्टे ब्रह्मवेति। येनाहं नामृता स्यामित्यमृ
तत्वोपक्रमाद्बृहदुदुभ्याहिजिज्ञस्तदुपपादनात् ब्रह्म तं परादादित्यादि द्वैतनिंदा इदं ब्रह्मेदं क्षत्रमित्यार
भ्येदं सर्वं यदयमात्मेत्यंतमद्वैतगुणकीर्तनं। अस्तीत्याख्यातप्रतिरूपकमव्ययं अविद्यमानपूर्वपक्षमि
त्यर्थः। यद्यपीह जीवब्रह्मलिंगसंदोहे सर्वात्मब्रह्मण्यंतर्गतं तो जीवधर्मान्ब्रह्मपरतया योज्यंतेत्रा
स्यर्थः। यद्यपीह जीव [illegible] नापि प्रसिद्धजीवानुवादेनाप्रसिद्धब्रह्मात्मत्वबोधनपरतावधार्यते सुबु
तर्दनाधिकरण एव तल्लिंगैः तथापि जीवमनूद्य ब्रह्मत्वबोधेनाहनुवाद्यविधेयपर्यालोचनया तेद्दावेति मत
ष्प्रकांस्यधिकरणे तल्लिंगैः तथापि जीवमनूद्य [illegible]
निरासेन ऐकांतिकमद्वैतं प्रतिपाद्यत इत्याह। मैत्रेयी ब्राह्मणे विषये जीवमात्रपरत्वप्र
निरासेन ऐकांतिकमद्वैतं तं प्रतिपाद्यतइत्याहात्रोच्यत इति। भोक्तृत्वादीनां भेदाभेदपरत्वेन शंकयमा
र्वपक्षेण प्रस्तावमात्रं तत्किमर्थमित आह भोक्तृत्वेति भोक्तृत्वादीनां भेदाभेदपरत्वेन शंक्यमा
नानां समाधये समाधानाय इत्यर्थः। भोक्तृत्वं विभजते पतीति आत्मनस्तु कामाय पतिः प्रियो भवति आ
त्मनस्तु कामाय जायाप्रिये त्यादिसंबंध इत्यर्थः। तत्र नाम हनापीति॥ विज्ञातारमरे केन विजानीया
दिति श्रुतिमित्यर्थः। जीवरूपेण ब्रह्मण उत्थानमुत्पत्तिमाह। साक्षाद्वेति। भोक्तृत्व [illegible] तत्त्वाभ्यामभ्यां

वेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्या
नानीति। अथर्वाङ्गिरसां तथा च तु विधो मन्त्रः इतिहास उर्वशी हाप्सराः पुरूरवसं मैसकमर इत्यादिः।
पुराणं सदेव सोम्येदमग्र आसीदित्यादि सर्गादिकथनं। विद्या देवजनविद्याध्यायाः उपनिषदः प्रियमित्ये
तदुपासीतेत्याद्या रहस्योपासनाः। श्लोकाः ब्राह्मणप्रभवा मन्त्रास्तदेते श्लोका इत्यादौ निर्दिष्टाः। सूत्रा
ण्यात्मेत्येवोपासीतेत्यादि वस्तुसंग्रहवाक्यानि। अनुव्याख्यानानि संग्रहविवरणानि। व्याख्यानानि मं
त्रव्याख्याः इत्यष्टविधं ब्राह्मणमित्यर्थः। श्रुतोक्तेशाद्दृष्टार्थादर्थस्य स्थितिरुक्तेति वदन्नामरूपप्रपञ्च
।१३८५। कारणतां ब्रह्मण इति भाष्याभिप्रायमाह यद्वा वेति सिद्धान्त एव प्रकृत इति गतार्थत्वं शंकते ननु संकाव ॥१३८॥
सरेऽपि युक्ता सिद्धान्तसाध्यव्याख्या स यथा सैन्धवखिल्य इति वाक्येन ज्ञाननिमित्त आत्यन्तिकप्रलयः
प्रपञ्चस्योक्तस्य किं तत्र माह यथा सामुद्रमिति खिल्योद्धृतः आत्यन्तिकप्रलये प्राकृतो प्रलयो दृष्टान्तत्वेनोच्यत
इत्याह नेत्यादिना समुद्रे त्वपां प्रलयः प्राकृतप्रलये दृष्टान्तो स यथा सर्वासां स्पर्शानां त्वगेकायनमित्यादि दृष्टान्तप्रबन्ध
स्तत्र हि महाप्रलयसमये त्वगादिशब्दस्य स्पर्शत्वादिसामान्येषु तद्विशेषाणां तेषां च सामान्यानां क्र
मेण ब्रह्मणि प्रलय उच्यते इति। एवं वा अर इदं महद्भूतमिति श्रुतिं व्याचक्षाण उदाहरति द्वाभ्यामिति करणैर
वच्छेदोऽस्त्वं यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति वाक्यं विभजते न्महोवाचेति। यत्र त्वस्य सर्व

मा॰ह्याममृतत्वेति।अमृतत्वसाधनज्ञानोपन्यासाय वैराग्यमुक्त्वा दर्शयितुं वाक्यसंदर्भमुवाचेत्यन्वयः।वाक्यसं
दर्भमाह स्म त्यात्मेति।आत्मा वा अरे इति कृतसंधिको वेदद्रष्टोऽनुकाराद्दाशङ्क्यः।विहितानि विधिवन्नि
गदैर्बोधितानीत्यर्थः।कस्मादित्यत्र इहश्रवणादित्यनुषंगः।श्रवणादीनि साधनानि यस्य तत्तथोक्तं।आत्मनो वेत्या
दिवाक्ये विदितमित्यस्यानंतरं भवतीति शेषो द्रष्टव्य इत्यर्थः।मतिर्मननं।विज्ञानं निदिध्यासनं।श्रवणादिनापि
दर्शनं तेनेत्यर्थः।आत्मदर्शनफलमुक्त्वाऽनात्मदृष्टौ दोषदर्शकं वाक्यमवतारयति कुत इति।ब्राह्मण्या
द्यभिमानोनियोऽयत्वाविर्भावनेनात्मतत्त्वाद्धि दुंशयेदित्यर्थः।यथा दुंदुभेर्हन्यमानस्य नवाद्याञ्छब्दां
च्छक्नुयाद् ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीत इत्यादि श्रुतिस्थितमनुमानं।वि
शदयति प॰ त्वेवं।तद्वदिति।सदृष्टांतो यथा लोके दुंदुभेर्हन्यमानस्य लक्षण ग्राह्यहन्यमानदुंदुभ्य
भिव्यक्तशब्दत्वसामान्यस्य विशेषभूतान् शब्दान् सामान्याद्भात्यत्वेन ग्रहीतुं न शक्नुयादिति सतिरेकः।
एवमन्वयोपि दुंदुभिशब्दत्वस्य ग्रहणेन तद्विशेषशब्दो दुंदुभ्याघातसंज्ञको गृहीत आघातस्य वा ग्रहणेन त
द्गतांतरविशेषशब्दो गृहीतइतिश्रुत्यर्थः।आर्द्रैधोऽग्नेरिति आर्द्रैधाः अभ्याहितः रूपचितः पंचम्यर्थेच
धूमोधूमग्रहणं विस्फुलिंगाद्युपलक्षणार्थं।किं तन्निश्वसितं तदाह श्रुतिः।यदृग्वेदो यजुर्वेदः साम

फलप्रदाः नाम नाड्यो द्वासप्ततिसहस्राणि ताभिः प्रत्यवसृप्य पुरीतति शेत इत्यत्र पुरीतदर्थ्यात्माधारत्वोक्ते
रेवमाकाशः किं न स्यादत आह य एष इति। भूतयमर्थमिति जीवनिरासहेतुप्रश्नोत्तराभ्यां स्थितपाक्षिप्तादेः सू
त्रेष्वोत्सूचना आनन्दमयाधिकरणभाष्योक्त प्राणादिव्यतिरिक्तोपदेशं दर्शयति तोहेति महत्वान्नहेतुं हनूपाड
र आपो वासस्तद्वे नास्य विद्यते इति तत्रोक्तः। प्राणस्यैवस्वं ज्ञात्वा सोमराजत्वं अपेतु तस्य प्राणस्यापेः
शारीरं ज्योतीरूपमसौ वा इद इति श्रुतेः। आपेषं आपिथ्यापिष्य यत्र सुषुप्तस्तत्स्थानं किमिति प्रश्नः यदा पुरुषः
स्वपिति त्यथ तदा प्राण एवैकीभवति प्राणः सर्वदेवानामात्मत्वेन महत्वाद्ब्रह्मतच्चात्र ब्रह्मत्वादिति परोक्षपास
स्तेतपरोक्षप्रियत्वाद्देवानां अस्माद्ब्रह्मराह्वात् पूर्वपक्षे ब्रह्मोपक्रमः प्राणे घटितः। सर्वेषां श्रेष्ठत्वं गुणोक्त
॥१३७॥ र्वं आधिपत्यमैश्वर्यं स्वाराज्यं अनन्याधीनत्वं मनः मन उपाधिको जीवः प्राणबंधनः प्राणाश्रयः। वाक्यान्व ॥१३७॥
यान्न। अत्र जीवब्रह्मलिङ्गानां विरोधः पूर्वत्र ब्रह्मोपक्रमात् तत्परत्ववदिहापि जीवोपक्रमात्तत्परत्वेति।
संगतिः क्वचित्समन्वयस्य जीवमात्रपर्यवसानं निषेध्यात्साक्षात्संगतिः। मैत्रेयीब्राह्मणार्थमनुक्रामन् प्रातर्दन
नयेन जाग्रितामाशंकते नन्वित्यादिना। पिपासतां तु मिष्ठता। कात्यायन्या द्वितीयभार्यया। पद्यदितो गोः
तावन् प्रातर्दनमामृताकिंस्यामिति प्रश्नः। उपकरणवतामशनवसनादिमतां। सिद्धरूपस्य वित्तस्यामृतत्व
साधनाभावप्राप्तेः प्रतिषेधायोगमाशंक्य तत्साध्यकर्मद्वारा प्राप्तिमुपपादयत्येवमिति। श्रुतौ तत [illegible] छद्वार्थ

पुरुषाणां परामर्शे एतेषां पुरुषाणां कर्त्तेत्यनेन पुनरुक्तिरित्युक्तं। तत्र पूर्ववादिनः पुनरुक्तिपरिहारमाशंक्य
भाष्यव्याख्यया परिहरति निर्दिश्यन्तामित्यादिना। कृतिशब्दनिर्दिष्टेति। यद्यपि कर्त्तेति शब्दे कृतिरपि भाति
तथापि प्राधान्येन। निर्दिष्टेत्यर्थः। कार्योत्पत्तिः कर्तृव्यापारस्य साध्यतया फलत्वात्तत्वं नास्ति येयत्वं किं
त्वनुपपत्तिगम्यत्वं। न देव दृश्यते न हीति। शब्दोक्तपुरुषाणामेतच्छब्दापरामर्शेन आर्थसन्निधिना जगन्मात्रपरा
मर्शेनैव कृतप्रतिवचनमपि पौनरुक्त्यचोद्यं भाष्ये क्रमप्राप्तं व्याचष्टे ननु प दीति। इदानीमन्यार्थं तु जैमिनिरिति सू
त्रस्य भाष्याणि व्याचष्टे ननु प्राण एवेत्यादिना। प्राणशब्दो हिरण्यगर्भवाची कुतोऽस्य प्रतीतिरिति शंकार्थः
आत्मशब्दात् गम्यत इति परिहारः एतस्मादिति वाक्योदाहृतेरेव वेदान्तार्थत्वासिद्धेरुत्तरभाष्यं तेषु व्यर्थमाशं
क्य सर्ववेदान्तानुगतिस्तेन दृश्यते इत्याहापि चेति। भ्रमसंस्कारे सत्यपि प्रोद्भूतभ्रमाभावान्मुक्तोपमानं सुषु
प्तेरूपसाध्ये नमाप्ये कृतमित्यर्थः। विभक्तेत्युपाधिजनितविशेषेत्यादिभाष्येणेति शेषः। नह्याचष्टे उपाधि
जनितेति। ननु विज्ञानमित्येवास्तु किं विशेषेति विशेषणेनात आह यदीति। एतद्विशेषणाविशिष्टं विज्ञानं यत
तन्नष्टे नसद्रूपं ब्रह्मैव स्यात्तच्च नित्यमिति कृत्वा नोपाधिजनितं नापि तेन ब्रह्मस्वरूपेण रहितमात्मनः स्व
रूपमतो विशेषपदेन ब्रह्मस्वरूपविच्छेद्यं रहितस्याभावे हेतुमाह। अप्रकाशस्याप्रहाणादिति। एतस्याः ईशरूप
भागमननमिति भाष्यं व्याचक्षाणः सुषुप्तौ ब्रह्मभावे दृष्टीकर्तुं तद्व्यतिरेके संसारमाहयदा त्विति। ननु हिताहित

कृष्ण

स्फलिंगाच्चेच्चेद्युरस्येवमेवास्मात्सर्वे प्राणा यथायतनं विप्रतिष्ठंत इत्यादिकमयादानप्रश्नोत्तरे बहुदृष्टं। एतानि न
नहिरण्यगर्भे संभवतीति जीवस्य जीवांतरात्मत्वायोगादित्यर्थः। प्रश्नस्योत्तरस्येति चैकवचनेन नं बहुत्वेवज्ञा
त्वपेक्षां। न केवलमनुपपत्त्या प्रश्नोत्तरयोर्ब्रह्मार्थत्वमपि त्वात्मशब्दादपीति वकुपृच्छत्यप्यकस्मादिति। निर्णीतार्थ
वाक्ये रूढिर्बाध्येत्याह तदेवमिति। व्याप्तशक्तिर्धाने सतीत्यर्थः। ननु तवापि सर्वकर्तृत्वेसि ह आह इत्यादिकर्तृत्वपुन
रूक्तमत आह तदुक्तमिति। न तावद्व्यापकोक्तिरेकदेशोक्त्यापुनरुक्ताप्रवेन्नापेक्षरेशोक्तिर्व्यापकोक्त्यादित्यादेरन्य
त्राविशेषोर स्फ संकोचरतिवाक्याकिभ्रमापोहार्थत्वादित्यर्थः। कथं तर्हि ब्रह्मपरे वाक्ये जीववाची पुरुषशब्दः=
१३६ श्चातआह जीवेति। प्राणयतीति योगादित्यस्य संज्ञाप्रदब्रह्मप्राणशब्दो वक्ति जीववाची तु पुरुषशब्दो जीवसुप्तिस्थान
कृतब्रह्मणोऽध्येवर्थ इत्यर्थः। ब्रह्मभावापेक्षया ब्रह्मशब्देन जीवोपलक्ष्यते ब्रह्मशब्दोपक्रमो मृषावादिवाक्य १३६।
पवादविश्वकर्तृत्वं च वक्तुं सममंजसमित्यर्थः। ब्रह्मत्वेन जीवस्य न प्रतिपाद्यतापीत्याह नवानधिगतेति। स्वरसः
स्य भावः। ब्रह्मणाऽलोकानधिगते नाधिगत जीवोपलक्षणं चानुपपन्नमित्यर्थः। ननु किं जीवस्य ब्रह्मोप
लक्ष्यकत्वे न प्रसिद्धावपि जीवप्राणावनूद्य नामादिवदुपास्ति विधीयतामिति शंकां निराकुर्वन् जीवमुख्ये
तिसूत्रं व्याचष्टे न च संभवत्येकवाक्यत्वे इत्यादिना एवं प्रसंगागतं जीवमुख्येति सूत्रं व्याख्याय याथिक
रणाद्यसूत्रव्याख्यामेवानुसरति स्यादेतदित्यादिना। पूर्वत्रस्पर्शे वैतत्केषम्प्रेत्येतच्छेदेनादित्यादि पुर

स्फुलिंगा व्युच्चरेयुरेवमेवास्मात्सर्वे प्राणा यथायतनं विप्रतिष्ठंत इत्यादिकमप्यादानप्रश्नोत्तरं बुद्धिस्थं। एतानि न
न हिरण्यगर्भे संभवंतीति जीवस्य जीवांतरात्मत्वायोगादित्यर्थः। प्रश्नस्योत्तरस्येति चैकवचनं बहुत्वे जा
त्यपेक्षं। नकेवलमनुपपत्त्या प्रश्नोत्तरयोर्ब्रह्मार्थत्वमपि त्वात्मशब्दादपीति व कुपृच्छत्यप्यकस्मादिति। निर्णीतार्थ
वाक्ये रूढिर्बाध्येत्याह तद्देवमिति। व्याप्तार्थकसंनिधाने सतीत्यर्थः। ननु तवापि सर्वकर्तृत्वेऽस्तीह आदित्यादिकर्तृत्वं पुन
रुक्तमत आह तदुक्तमिति। नतावद्व्यापकोक्तिरेकदेशो त्यापुनरुक्तापत्तेर्व्याप्येकदेशोक्तिर्व्यापकोक्त्या। इत्यादेरन्य
त्राविशेषेऽपि रक्षसंकोचरतिवाक्यशिक्षमापोहार्थत्वादित्यर्थः। कथं तर्हि ब्रह्मपरे वाक्ये जीववाचीपुरुषशब्द-
१२६ श्रुतत आह जीवेति। प्राणयतीति योगादिस्पष्टं ब्रह्मप्राणशब्दो वक्ति जीववाची तु पुरुषशब्दो जीव तु निर्स्थान
कृतब्रह्मणोऽन्वेत्येवेत्यर्थः। ब्रह्मभावापेक्षत्वाद्ब्रह्मशब्देन जीवोपलक्षणे ब्रह्मशब्दोपक्रमोऽमृष्यावादिवाक्याक्य १२६।
पवादेर्विश्वकर्तृत्वं च वक्ष्यमाणं जलमित्यर्थः। ब्रह्मत्वे जीवस्य न प्रतिपाद्यतापीत्याह नवानधिगतेति। स्वरस
स्य भावः। ब्रह्मणा लोकानाधिगते नाधिगत जीवोपलक्षणं वानुपपन्नमित्यर्थः। ननु किं जीवस्य ब्रह्मोप
लक्षकत्वेन प्रसिद्धावपि जीवप्राणावनूद्य नामादिवदुपास्तिर्विधीयतामिति शंकां निराकुर्वन् जीवमुख्ये
तिसूत्रं व्याचष्टे न च संभवत्येकवाक्यत्वे इत्यादिना एवं प्रसंगागतं जीवमुख्येति सूत्रं व्याख्याय यौधिक
रणाद्यसूत्रं व्याख्यामेवानुसरति स्यादेतदित्यादिना। पूर्वत्र स्पर्शे वैतत्केऽर्थे स्यात छंदोनादित्यादि पुर

शब्दादिति। नूद्धार्थं गृहीत्वा तदविनाभूतलक्षणादित्यर्थः। अथ हेति न तत्संबंधि निलक्षणा। यद्यपि ब्रह्मशा
ब्दाश्रवणात् स्पष्टं ब्रह्माभिधानं नोपलभ्यते। तथापि प्रश्नप्रतिवचनयोः क्वैष इति आपाए वैकधा भवतीति च
स्वप्नभीप्रश्नाभ्यां जीवप्राणाभ्यो भेदो वगम्यते। अत आह जीवव्यतिरेकश्चेति। जीवातिरिक्तो हिरण्यगर्भस्य प्रा
णत्वान्न ब्रह्मसिद्धिरित्यस्माकमिष्टासिद्धिरित्यर्थः। मृषेति। आदित्यादीनब्रह्मणो ब्रह्मेति मृषावादिनं वाला
किं मृषा वै खलु मा संवदिष्ठा इत्यापाद्य निरस्य सत्यं ब्रह्माभिधित्सन् राजा यदि स्वरूपेण जीवं प्राणं वा ब्रूया
त्ततो सत्यं ब्रूयाद्वा हीस्याद्यदि जीवादि ब्रह्मत्वेन वदेत्ततो मिथ्यावदेनत्वानुपपन्नं तस्माद्ब्रह्मैव वदतीत्यर्थः। का
नरइइ नीलक्षमानवर्णामिति मिथ्यावद्य मिथ्यावदनं। एवं च भिन्नवक्तृकवाक्यद्वयस्यापि धर्मप्रसक्तितन्निरा
समरतयैकवाक्यत्वात् अक्षेपक्रमसिद्धेः सिद्धं चास्योपसंहारेण संगानमिति ब्रह्मपरत्वं सर्वस्य संदर्भस्येत्या
ह तस्मात् ब्रह्मतद्इति। हेतूनां ब्रह्मपरत्वनिश्चीयतद्रत्कपरिहनप्रति तथैवान्वयः सर्वश्रुतेरसंकोचो निरति
शायफलोनोपसंहारे हेतुरुक्तः यद्वादेति वैरेकनिर्देशो हिरण्यगर्भस्यादिति तत्राह। क्वैष इति। हे बालाके
एष पुरुषः क्वैतदशयिष्ट एतदिति क्रियाविशेषणं इत्यामित्यर्थः एवं जीवाश्रयः प्रश्नः क्व वा एतदभूदिति भ
वनप्रश्नः। भवनं तादात्म्येन वर्तनं शयनमसंबोधः कुत एतदागादित्यपादान प्रश्नः आपाए वैकधा भवतीति
भवनप्रश्नोत्तरं। आदिशब्दात्तदेनं वाक्सर्वैर्नामभिः सहाप्येतीत्यादि शयनप्रश्नोत्तरं यथाग्नेः क्षुद्राः वि

क०८८

शाकल्य तस्य हिरण्यगर्भरूपेण वेश्यत्वोपपत्तेर्वाक्यशेषस्य च प्राणश्रुतेः कर्मशब्दस्य रूढार्थत्यागाभावाच्च प्राणस्य
व कर्मसंबंधीत्याह वाक्यशेषं चेति। त्रयस्त्रिंशदादिदेवानां कारणभूतः कोदेवः कतम इति पृष्टे शा
कल्ये स तदा हिरण्यगर्भात्मक प्राण कार्यत्वमादेशत्वादेरित्यर्थः। पाप्मसु भूतेषु चायं लौकिक वृत्तिः संकुचि
तवृत्तिः सर्वशब्दः। संकोचमेवाह च दूनिति। संप्रति विप्रतिपन्नवचनयोरेकत्वमुपेत्यापि पूर्वपक्षसंभवमाह
यादित्विति। यद्यपि गार्ग्यो ध्यातस्तथापि तत्रांते ब्रह्मोपक्रमः सहस्रमेतस्यां वाचि ददम इति ब्रह्मप्रतिज्ञा
यां शतलागोसहस्रस्य दत्तत्वात्। अत उपक्रांतं ब्रह्मैव गार्ग्यप्रतिविशेषतो निरूप्यमिति यदि मन्येत तथापि
॥१३५॥ कवादीनामपि नैतत्परब्रह्म। तथा न उपसंहारे जीवनिर्णयादित्यर्थः। उपेतं शिष्यभावेन गतं। प्राणो हि
सुषुप्तौ व्याप्रियते स चेतनश्चेदूहत्वात् [illegible] शिष्यं नाम जानीयात् न च जतिवान तस्य सुषुप्तस्य याष्टिघा १३५॥
तेनोत्थापनात् प्राणादिव्यतिरिक्तं बोधयतीत्यर्थः। उपसंहारशेषोपि जीवपर इत्याह परस्तादपीति। ननु
जीवस्यापि सर्वगतस्य निरवयवस्य च परिस्पंदपरिणामयोरसंभवात्कथं परस्यैवैतत्कर्मेति निर्देशस्तत्राह
यस्य चैतदिति। जीवप्रेर्यदेहादिसंबंधि कर्मणश्च जीवसंबंधित्वेनोपचर्यत इत्यर्थः। साक्षाज्जीवसंबंधिधर्म
धर्मौ कर्मशब्दो व्याकृताणिक इत्याह कर्मजन्यत्वादिति। ननु योगद्वारा जगद्वाचिनी यतां ने लोहरूढ्यनुसा

मित्यर्थः। मध्ये पि ब्रह्मपरामर्शमाह। आदित्येति। पुरुषकर्तृत्वस्य ब्रह्मणोऽन्यत्रासंभवादित्यन्वयः। अवच्छेदकेप्रकर
णादौ वस्तुतो नान्यत्र प्रमाणमस्ति। इहमात्र जगतः परामर्शोऽस्तीति यज्जगत्कर्तृत्वमर्गवेतं तस्य च ब्रह्मणोऽन्यत्रासंभवा
दित्यर्थः। जगत्कर्तृत्वमन्यत्र ब्रह्मणो नेति युक्तानि। वाचस्पतावनुपलब्धेऽपि मूलानाढ्योऽयो विरोधपरे। जीवास्तु तेऽजग
त्सर्वं सकारणमिति ब्रुवत्। द्विपनू समन्वयं जीवेन च्छेद्रो वाक्यतिः कथमिति। अधिष्ठाने हि ब्रह्मन जीवः
अधिष्ठाने च समन्वय इत्यनवद्यं। इह हि वाक्यभेदापादने न तावदस्य तात्पर्यमित्याह। उभयतरस्मादिना। अ
त्रवाष्कलिवाक्याद्ब्रह्म मन्यते सिद्धान्ती राजवाक्य ~~भेदेन~~ ह्यनाद्य इत्याह ब्रह्मेतरत इति। न द्वितीय इत्याह यस्य
चेति। ननु वाष्कलिवाक्यगतब्रह्मप्रतिज्ञया राजवाक्यं ब्रह्मपरमस्तु भिन्नवाक्यादिवाचार्यवाक्यमित्याशं
क्याह न चेति तत्र हि वक्तृभेदेऽप्येकवाक्यताऽग्निनिर्दिशिंतौ। आचार्यस्त्वेतेन निवकेतिर हेतुभावाद्वाक्यभेद
रित्यर्थः। ननु वाष्कलिवचने ब्रह्मशब्दस्य का गतिः अत आह। तस्मादिति। शब्दवाक्यार्थ एव ग्राह्याभ्यां न त्वा
तृगार्ग्योक्तिरत्र पूर्वपक्षत्वादस्मत्त्वादित्याद्येत्यर्थः। ननु राजवाक्येऽप्यंगीक्रियमाणे सर्वजगत्प्रातिकर्तृत्वं
ब्रह्मलिंगं गम्यते। तत आह। अन्यचेति। ब्रह्मकार्ये जगति योगसंभवमंगीकृत्य नू ध्यापारे हारमुक्त्वा योगासं
भवमाह न च ब्रह्मण इति। उदासीनस्येत्यस्येदं तो त्वाब्रह्मणि कृत्स्नभावाज्जगत्त्वकृतत्वा योगद इत्यर्थः॥
ब्रह्मणो यदि नव्यापारत्वत्तत्राकस्य तर्हि ननु प्राणस्यास्त्वनुसोपि कथं वेदितव्यतयोच्यते प्रसिद्धत्वादस्यो

पेक्षेत्यर्थः। इदमसादिवाव्यक्तं आसीत्। तद्यदात्मना आसीत् तत्कारणं सत् अर्थक्रियोन्मुखमासीत् का
र्यरूपेण च सम्भवत्। तत्र कारणविषये एके आहुस्तेषां मतं दूषयति कुतस्त्विति। तद्देवाह कथमिति व्यतिरेकमु
क्त्वा अन्वयमाह सत्त्वेवेति। इदं जगत् तर्हि इदानीमव्याकृतं कारणमासीत् तत् किं तत्कारणं शब्दार्थात्मना व्या
क्रियत क्रमेण च तत्। भाष्ये तद्द्विरूपेण कामयित्वेव वचने नेतिसोकामयतेत्यत्र नेत्यर्थः। अपरस्प्रेक्षत्वमिदं
सर्वमसृजतेति ख्यातं न्यं। तस्माद्वा एतस्मादात्मन इति तद्विषय आत्मशब्दः। संप्रदायविद्वचनेनान्यथा
न्यथेति विप्सा इत्युक्त्वा ब्रह्मसुवर्णं। अव्यक्तापि ब्रह्मात्मैक्यबुद्धेरिति शेषः। प्रतिपाद्ये ब्रह्मणि नास्तिकेन्द्रेण विज्ञान
॥१३४॥ मित्यर्थः। मृत्युमत्येतीत्यन्वयः। ब्रह्म इत्यनेन वेदः वेदं साधुः स्यत्। परस्परमात्मावलोकेनोपलभ्यते इतिवत् कः। पूर्णो १३४।
तिमिन्नुत दातिच श्रोत्राद्यात्स्वोवति॥ ७५॥ जगद्वाचित्वात्। अत्र काचित्क हैरण्यगर्भमतं द्योतककर्मशब्दस्य
ब्रह्मानुगुण्यवर्णनात्संगतिः। उपक्रमानुरोधात् ब्रह्मेति उपसंहारानुरोधेन जीवः ब्रह्मवाद्दृश्य
सब्रह्मस्य द्विलाचभ्रतरति प्राणेपिप्रयुक्तत्वादिति शेषः। एकवाक्येसच्छब्दात्सच्छब्दो नीयतां वाक्यभेदस्तु न प्र
ह्मशब्दात् कर्मशब्देन यद्वा इति संगतिः। यद्वात्व त्राप्येकवाक्यत्वं तद्वाक्यशेषोत्तरस्सच्छब्दानुसारेण प्राचीनो यच्छब्दा
नीत एवमुत्तरस्मात्कर्मशब्दात् प्रापो ब्रह्मस्य नयनमिति संगतिः। प्रातर्दनविचारेण गतत्वं शंकते नाचेति।
तत्र त्युपक्रमोपसंहारैकरूप्यादेकवाक्यत्वे सति जीवप्राणलिङ्गयोर्ब्रह्मपरतयानयनं कृतं तद्दिहापि सम्भे

तया समन्वयो नासिद्ध्यति पराभ्युपगतमेवं रूपपूर्वपक्षनिषेधार्थ इत्यर्थः कारणत्व इति सप्तमीमादाय सू
त्रैकदेशेन वाक्यानां कारकेण कार्ये परस्परविरोधे तत इति पूर्वपक्षोक्तहेतोरसिद्धिरुक्ता। मानप्रतिपत्तयोच्यत इत्या
ह ज्ञाका सा सिद्धिरित्यादिना प्रतिज्ञानविज्ञानाभावे हेतुपरं सूत्रावयवं व्याख्यायैकुत इति। पुनरावृत्या कारणत्वेनेति
तृतीयांतमित्युभा वाक्यार्थविवक्षित्वा यथाव्यपदिष्टपदार्थविवरणपरत्वे न व्याख्यातिकेनेति। एवं कारणवि
ज्ञानेनिषेधकत्वेन सूत्रं व्याख्याय संप्रति कार्यविज्ञानुपरिहारपरतया योजयत्यनुरति कथ्यमः प्रकारः। अस्यां
व्याख्यायांच कारः समुच्चये। नदुक्तं नस्पष्टाव पीतिकारत्वेणं न विज्ञानं नर्वेव कार्यक्रमे इति सूत्रे इह प्रतिज्ञे। आद्या
प्रागुपपादिता द्वितीयायां हेतु योजयति यथा व्यपदिष्ट इति यथाशब्दो ऽनतिक्रमार्थः अलयस्तेजः सृष्टिमात्रमुक्तं
न क्रमो भव्यन्तर इत्यर्थः। परस्य कार्यांतरस्य व्यवधानमंतरेणतेजसोजलस्य भवत्वाभिधानात्क्रमो सन्निरपीसेवा
ऽतक्रमभंगाद्यथा व्यपदिष्टोक्तिरसिद्धेति शंकते नन्वेकत्रेति। सिद्धांतीनुस्याक्षा द्रुमस्य सृष्टत्वमव्यवधानानि देशस्य प्रयो
ज्ञानेन ननु कार्यांतरस्यासर्ग इति मन्वानः पूर्ववद्वावृत्या तृतीयांततामादाय साक्षात्सृष्टं वाच्याहृत सूत्रावयव व्या
ख्यायापरिहरति। अतआह हेति। पूर्वत्रेत्थंभावे व्याख्यातत्वात् द्रुमनुत्यर्थमाह हेतावित्ति। अयिस्तात् घृतचूर्णद्र
ष्टीर्णा कार्या। नामरूपाभ्यां व्याक्रियते तेनि कर्मकर्तरि कर्मणि वा ठकारः आद्येकर्मत्रपक्षत्रे हेतुमाह न होति तूयतं
के द्वारः स्वयमेवेति भिन्नकर्तृके कर्मे न सो कर्यापेक्षया कर्मकर्तृत्वमुच्यत इत्यर्थः। द्वितीये तिस्फुटे वाच्यकर्त

नानाकार्याणि कुर्वाणो देवदत्ते प्रथमस्येवारम्भस्यापि तेन साक्षात्स्पृष्टत्वात्ततो निष्पत्तिर्वक्तुं शक्या तथा पूर्वकार्यस्यो
त्तरकार्यनिमित्तत्वात्तु कार्यात्कार्यान्तरसंसर्गश्च शक्यवचन इति दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह तत्र येहापीति अनन्त
ळिळेतितेजसः प्राथम्यनिर्देशस्तत्त्वमाध्यम्य गृहनस्य प्रकृतत्वात्। तर्हि किं तत्त्वात्। नहि कथ्यानि दृशविरोधस्तत्राह्य
सिद्धिविति। ओं ओंकाराशवायुतेजसां क्रमेणोत्पत्तिमुक्त्वा व्युत्क्रमाभिधाने हि विरोधः स्यान्नतु तेजसः साक्षाद्भूलक्षणः स
ळिमात्राक्रियानेन त्यनेन क्रमो बाध्यत इत्यर्थः। एवमपि त्रुत्स्यभावमुक्ता नस्त्रष्टशे तिश्लोकभागं व्याचष्टे ष्फ
पत्तेति। प इत्वादि धूमसंदेहेन दहनसंदेहवत्स्वजसंदेहात्स्पृष्टसंदेह इति तद्दूनु आपनुदति न वस्तु द्विविनोगान
॥१३३॥ मिति। सत्यादिळक्षणकमानगमाय तद्दानं योपपिपाद्दपिनयाजगतस्तत्रारोपः श्रुत्यासहद्विरूच्यते मनुसृष्टो ॥१३३॥
तात्पर्यमतो मिथ्याभूतायां सृष्टौ विगानं न दोषोपित्वळंकार इत्यर्थः। ननु सृष्टेः कुत आत्मत्रामित्यर्थता विपरीत
ताकस्मान्नस्मादित्तत आह तत्तु ज्ञानं चेति। तदनुगुणतयाति व्याख्याताव धृतपूर्णदीकायपमित्यर्थः। मतत्त्व
स इत्येव मन्वयेति श्लोकभीग व्याख्येयप्रकारण इत्यादिना। तदप्येव इत्यादि परिहारः। अस्ति ब्रह्मेति चेद्वेदेतिप्र
कृतं प्रसृत त्रशाद्धाः समानार्थे तच्छब्देन परामृष्य श्लोके नासदभिधाने श्लोकवाक्यसंवं हे स्मादेत्यर्थः। श्रुत्यंत
इस्सदेव सोम्येत्यादि। मानान्तरं विमतं स तुल्यं कार्यत्वात् लंभवारित्याद्विनिरा कार्यं तया कविदिति श्लोकभागवि
नजेत हेक इति। यदा कार्यविगानमुपेत्य कारणेतद्भावकल्प्यते तदा समुच्चयाभावाच्चकारस्य शङ्कास्समानार्थ

पादांतरसंगतान्यप्यवांतरसंगतिर्लोभादिहठाठिखितानि।प्रकृतिश्चेत्यस्य त्वध्यायस्यावसाने ठिखने निमि
त्तं वक्ष्यते।एतेनैतस्यापि न्यायस्यातिदेशत्वादध्यावसानएव निवेशः।जगत्कारणवादिवाक्यानि ब्रह्मणि प्रमाणं न वेति
विप्रतिपन्ने विशेषे पूर्वत्रान्नत्युक्तौ निषेधे विकल्पे नोपास्तो।निवेशाद्विरोधत्वकरहेतुसिद्धे कारणे विकल्पायोगाद्विरो
धेसत्यप्रामाण्यमिति पूर्वपक्षमाह वाक्यानामिति।वाक्यानां कार्यविरोधात्कार्यद्वारगम्ये जगद्योनोन समन्वयो वेदां
तानां कारणे विगानात्तदुपलक्ष्ये परात्मनि चेन्न सिध्यतीत्यर्थः।विभिन्नक्रमाऽक्रमा व युगपदुत्पत्तिस्तत्र
तिपादकानामित्यर्थः।आत्मनः आकाशस्तेजोसृजते तत्र विभिन्नः क्रमः।सएमान् लोकानसृजतेत्यक्रमर
ति।तन्नामरूपाभ्यां व्याक्रियते त्यादीनि कर्मकर्तृविधानात्स्वयं कर्तृकत्वं शंसीनीति।ननु कार्यविगाने ब्रह्मणि।किमा
यातमत आह सृष्टा वेति।धूमधूलिसंदेहे तन्न व्यामिसंदेहे तद्गमके कार्यसंदेहात् गम्यब्रह्मसंदेह इत्यर्थः।
कार्यविगानमभ्युपेत्याह सर्गे तिस्यमं कर्तृकत्वाऽन्यकर्तृकत्वाभ्यां सर्गे ऽक्रमाक्रमप्युत्क्रमैस्तत्क्रमेव विवादे
पि सृष्टरि स विवादो न विद्यते सर्गस्य वा वि वक्षितत्वात्तद्विवादोऽकिंचित्कर इत्यर्थः।कारणविगानं परिहरति स्वत
स्त्वेति।असद्वा इदमग्र आसीदित्यादावसद्शब्देन व्याकृतनामरूपाभिव्यक्तिश्च न्यक्तिः।तद्धैक आहुरित्यत्र निराकरणीय
त्वेनानुवादो सदिह चरस्त्यर्थः।अपिशब्दात् सर्गक्रमे च न विवाद इति सूत्रवृत्तं तत्र कटयति नु तावदित्यादिना तत्र विभि
न्नक्रमत्वं तावत्परिहरस्यनेकारि वि।पर्षवद्दातः कुशलः सं पवनं मिश्रपांधृत पूर्णप कान्नविशेषः।क्रमेण

श्रम

ग्रत्वेनाभवमध्यं ब्रह्मनिश्चित्यु निश्चयेन तानवंतः पांचजन्यया प्रतमा। विप्रा इति तिविरा मनुष्यरूपया
रईडेआक्रांत मेघोवाजरैः स्वक्षत्रसृष्टाः। यत्सूर्यादि कालज्ञानवचैद्य मुनि तज्ज्योतिषामादित्यादीनां कालसकमम
तत्वेन आयुष्येत जीवनगुणतया वंदेवा उपासते तेनत आयुष्यं तो जाता। अस्मिन्मंत्रे षष्ठांत ज्योतिषां पंचवसं
रक्षासूरणंनाम ज्योतिषाष्टकस्यापि सत्वार्थं मत्वा पयोगादिहि कारणत्वेनोक्तेः। अकांडेन वत्सरे भविताकवि
व्यतिमानांतरविरोधपरिहारो द्वितीयाध्यायार्थः। श्रुतीनामितरेतरविरोधपरिहारस्य समन्वयसिद्ध
चेत्वादिहे ध्येनानाशाखागतवाक्यपर्यालोचननाएकशाखागतवाक्यपर्यालोचनया शाखानां
॥१३२॥ अन्योन्यं वाक्यानामपि इतरेतरविरोधपरिहारेण अद्वितीयब्रह्मप्रतिपत्तौ सिद्धांतस्यापि तियावत् ॥१३२॥
गतरस्याहनानेति नानाशिन्नाएकाबेति तयोकापदिमानांतराविरोधो द्वितीयाध्यायार्थस्तर्हि विषमादा
दोकथं श्रुतीनामितरेतरविरोधे वितानआह प्रासंगिकत्वाविति। विप्रतिषेधात्सरपक्षाणामनपेक्ष्यत्वैस्यापि
तत्प्रसंगे तान्निवृत्तिः प्रयोजनं तत्रैव प्रतिपादयिष्यतस्त्यर्थः। परैरुक्तावितोंदोषजातं तर्प्यः स्वदर्शने। इति
त्रिशाख्यमत्यंतविंतां तत्राकरोन्मुनिः। कश्चित्कस्यासच्छब्दस्य कर्मकर्तृप्रयोगस्यचासद्भावादपरत्वस्य
जावद्वादपरत्वच युदस्यमति सामान्यमवस्थापनात्मा इसंगतिः। अथवैनद्वारभ्य त्रीण्यधीकरणानि

मुख्यात्तत्तं न देयं। उद्भिदा यजेत पशुकाम इत्यत्रोद्भित्पदं कर्मनामधेयं न विधेयगुणसमर्पकमिति संशये उद्भि-
च्छब्दस्य खनित्रादौ प्रसिद्धेर्नामत्वे च प्रतिसमानार्थत्वेनानर्थक्याज्ज्योतिष्टोमे गुणविधिरिति प्राप्ते राद्धां-
तः। अत्र हि यजेतेति यागेन भावयेदित्यर्थः। तथा चोद्भिदेति तृतीयान्तं पदं च ज्जिसामानाधिकरण्याद्यागना-
मस्यात्। न चेदं च वचनं गुणं शक्नोति विधातुं द्रव्ययागयोर्भेदे हि उद्भिदा यागेनेति सामानाधिकरण्यायोगात्। उद्भि-
द्वतेति कल्पने मत्वर्थलक्षणापातात् उद्भिद्यागं भावयेत् यागेन पशुमिति वैयधिकरण्ये तु यागस्य फलं प्रति सा-
धनत्वं गुणं प्रति साध्यत्वमिति वैरूप्यापातात् द्विधा वृत्त्या वाक्यभेदश्च। उद्भिनत्ति साधयति पशुमिति यागेऽपि प्रसि-
द्धिः स्यात्। न तु नामधेयत्वेऽत्र नामत्वसिद्धावन्यत्र साम दर्शपूर्णमासाभ्यां यजेत दर्शपूर्णमासाभ्यां स्वर्गका-
मो यजेतेत्यादौ नामधेयानुवादेन गुणफलविधिसंभवान्न ज्योतिष्टोमः प्रकृतो यत्र गुणो विधीयते तस्मान्ना-
मधेयमिति। एवं यथासन्निहितयज्ञानुरोधेनोद्भित्पदं यागनामधेयमेवं सन्निहितवाक्यशेषात् पंचजनशब्दः प्राणा-
दिषु रूढ इति भाष्यार्थः। यद्यप्युद्भित्पदं यौगिकं तथापि सामानाधिकरण्यादवगतेनामत्वे वय वानुगमः क्रियत इति रूढि-
तुल्यत्वाद्भाष्ये रूढित्वोक्तिः॥ यस्मिन्न्याकृतारव्याः आकाशश्च प्रतिष्ठितः तमेव तिष्ठं पंचं ब्रह्मात्मकममृतं मात्मानं
मन्ये त्वं किं विद्वान्मतं स्यादन्यो मर्त्यः न किं तत्त्वं हमस्य विद्यया मर्त्यः विद्वांस्कसन्नमृतब्रह्मात्मक इति मंत्रे दशो-
व वचनं प्राणादीनां जीवनादिप्रदत्वं पदलक्ष्यं ये विदुस्तेतस्य स्वरूपं पुराणं चिरंतनं अग्रे कार्यदशायामप्यक्षु

पुरुषाः पूरुषा नरा इत्यमरः ॥ हि उगौ। मनुष्येषु रूढस्य पंचजनशब्दस्य संबंधात् प्राणादिषु लक्षणया वक्ष्यतीति।
ननु रूढिसंभवे किं लक्षणया तत्राह नचेयमिति। अस्तु तर्हि तत्त्वेषु व्याख्यानिकः पंचजनशब्दो नेत्याह
एवं चेति। पञ्चोक्तवाक्यशेषयोर्विरोधात् न प्राणादयः पंचजना इति। तत्राह नच काण्वेति। पञ्चवस्तुनि निर्दिक्रम इ
ति तत्राप्याह न चेयमिति। उत्तरे मंत्रे विशिष्य वर्णात् तत्रान्वयव्यतिरेकसिद्धता न रूढिताप्युपास्तिः पुंसा विकल्पेन
कल्प्येत तु शक्येत्यर्थः। जनानां वाचकत्वेन न संबंधी शब्दो जनशब्द इति व्याख्यानाभावे दोषमाहान्यथेति। प्रत्य
क्षमिति। वयवार्थो यस्मिं तस्मिन् समुदायप्रवृत्तार्थे सिद्धा सक्तिमते प्राणादौ जनशब्दस्य समुदायैकदेशस्यार्थो नास्ती
ति जनशब्दस्य प्राणादौ कथं प्रयोग इति पञ्चोर्थः तद्दर्शयति अस्तु कोपालक्षं जत्वादित्यर्थः भाष्ये समाने रूढ्यतिक्र १३१।
॥१३१॥ मे वास्य शेषवशात् प्राणादयो गृहीतव्या इति प्राणादीनां लक्षणार्थत्वमुक्तं वाक्यग्रहणं तेषां प्रमितत्वार्थं शेषग्रह
णं सन्निहितत्वायेति लक्षणां दर्शयति जनसंबंधाच्चेति भाष्यं तस्य लाघवरूढ्यपरित्यागेनेति रूढार्थसंबंधादृष्टा
न्तरप्रतीतिसिद्धो न योगवृत्तिः प्रधानादौ कल्प्येति भाष्यार्थः। कुतस्तु रूढिविप्रयोगाद् दुर्बलत्वादाशंक्य सूत्रात्
कुत्सितमाह ननु सत्यमिति नोपसर्जनन्यायातिरेकोऽकरेणापि धारासंभवतीत्यत आह। प्रयोगानुसारित्वाद्व्या
करणस्य तद्दृष्टा वा न रूढिरिति साशंकते स्यादेतदिति मनुष्येषु पंचजनशब्दस्य लोक एव प्रयोगात् तत्संबंधा
त् प्राणादिषु वृत्त्युपपत्तिः स्फुटं जनसंबंधाच्चेति भाष्यसूचितां पृथग्वक्ति भगवान् भाष्यकारः प्रोद्यानुरूढिं स
मर्थयते इत्याह जनेष्विति। स्वकीयप्रतया स्फुटतयेत्यर्थः। शङ्कोद्भिदादिवदिति भाष्यं उद्भिदादिपदं इत्यधिकरण

प्रतिविशेषणं वाच्यं न विशेषणान्वयः ननूपसर्जनस्यापि विशेषणान्वयः किं न स्यादत आह विशेषणापेक्षायामिति
त्विति नैरपेक्ष्ये हि सामर्थ्यं साकांक्षत्वे च विशेषणेनान्वीयमानस्य न विशेष्यान्तरान्वय इत्यसमासस्यादिसमर्थः।
सापेक्षस्यासमासत्वेऽप्युदाहरणमाह नाहिकवतीति आदि विशेषणापेक्षस्य राज्ञो न पुरुषेण समासोऽपि तु परवृत्तिरेवं
प्रकारक्रमस्य रामस्य इतीति। उदाहरति भाष्यस्याप्यमर्थः स्यादहर् सर्वप्रतिप्रधानं त्रिधा विलक्षणातिरेकसमाधानाद्
समुच्चयमात्रस्य मिति चेत्कतार्हि गमनिका तत्राह यद्दीति। प्रधानं नित्यासंख्यो यथा दनेपितवनोपास्ते परं वचन
मिति यथा वस्त्रकं तत्राधारत्वेन यो करात्मनो योग्यप्रतिष्ठाहेतुत्वेन पृथक्कारेण काशपृथकुशोनिः ख्याप्यो
जन इत्यर्थः। कथं चेति भाष्यमयुक्तं पञ्चसंख्या द्व्यार्थत्वविंशतिः। सिद्धेरित्याशंक्याह द्विकसंख्ये इति। द्विकसंख्या
वाचि शब्दो संज्ञायां गम्यमानायामुत्तरपदेन समस्यते यथा दाक्षिणाभिः सर्वपदः इति सूत्रार्थः एकेनूपं चसं
ख्या द्वितीयपञ्चशब्दस्यापि संज्ञासमासगतस्य न संख्यार्थतेति ग्रंथार्थः। यद्यप्येवं यवनेथानस्यापेक्षो योगा
त्रिरपेक्षानूद्विवक्षीयसीनत्यापीठरूढमनुष्यये हेनिरूढा सर्पमुक्तमित्यत आह तद्यदीति। इह मनुष्याः वाक्येनसं
बंधा तद्गुणाद्वा अर्थान्तरवृत्तिसिद्धौ शब्दस्य ही अजाम [illegible] वाक्यविशेषयिनीति
रूढे योगिपत्तृते रूढार्थसंबंधात तद्गुणाद्वा अर्थान्तरवृत्तिसिद्धौ शब्दस्य न योगः कल्प्यत्यस्त्रोदाहरणमदाय यति।
उक्तोऽर्थस्यैवादेनयथाहुबेरूपेनो निपस्यादृतेएवमयांद्विवं तस्मात् एवं निपत्याहृतेयमपि चरतिश्येनेनेति। दोषोति
कमाह तथेति। अवयवार्थभूतपञ्चसंख्यासंबंधानपेक्षे। एकस्मिन्नपि मनुष्ये वर्ततेस्फः पुमांसः पुंवज्जनाः

असमासमभ्युपेत्यैवद्विःपंचशब्दप्रयोगेदशानामेवबोधः। भान्नसांख्यस्मृतिप्रसक्तिज्ञानमित्याहेतिप्रे
जना। असमासपक्ष एव वीप्सां विहाय विशेषणपक्षमात्रं व्याहन्नवेकेतिभ्रु क्वादिशब्दवत् पंचशब्दस्य
संख्यामुपसर्जनं कृत्वा प्राधान्येन द्रव्यपरत्वाद्गुणभूतसंख्यायां न संख्यांतरेण विशेषणं दत्यासनि
विशेष्येण द्रव्येण विशेषणेन च संख्यया युगपदाकृष्यमाणा संख्यानेकेनाप्यन्वियादित्यर्थः तद्देव
मिति। नानाभावे न दूषितमापि परमपूर्वं पाक्षिणं संख्यांतराना कांक्षा नोपसर्जनन्यायाभ्यां दूषयितुंदु
नरुत्थापयतित्य न्येः। दूदोसस्त्यामितित ह्ना राप्राणादिषु ळ्ळक्षणापांचस्त्यामित्यर्थः अनाकांक्षां दर्श
॥१३०॥ यति पंचपूळीत्यत्रेति पृथक्केन सहैकस्मिन्नर्थे यासमवेतिसातथोक्ताः एवं तद्विगुसमासेन समाहार ॥१३०॥
निधानात् पदंभशेपात्तसंख्यया समाहारो वच्छेद्यउत्पत्तिशिष्टयानुसमानपदास्थया समाहारिणः पूळा
अवछेद्या इति पंचपूळीत्यत्रास्त्याकांक्षा पंचजनाइत्यत्रत्वीवेतथात्र वर्णात्समाहारप्रतीते र्जना
नाव स्वपदगत संख्यया वच्छिन्नत्वान्नसंख्यांतराकांक्षेत्यर्थः। विजातीयविशेषणात्तरप्रयोगे नरक्तटपी
त्यायेन सजातीयप्रयोगेन हिन्नवतिरक्तःपटोरक्तइति। इहापि पक्षे नोपसर्जनन्यायमवतारयिष्यन्नाशंक
ते स्यादेतद्विति नाहि सापीति आत्माश्रयप्रसंगान्नसंख्यातयावच्छेद्यतेतः संख्यांतरकांक्षेत्यर्थः। तत्र चोक्तो
दोषपरिहारभाष्यार्थमाहउक्तइति। पंचशब्दस्य संख्योपसर्जनद्रव्यवाचकत्वादुपसर्जनसंख्यापान ग्रा
शेद्दांतरीकसंबंधिरत्यसमासवत्समासेपिदोषः समासे तु पंचशब्दोपात्तसंख्याया जनशब्दार्थे

पीसादिना। अपिशब्दे न विद्यत एवार्थोत्मना महासंख्यास्थ्वांतरसंख्यापरं त्वपरिच्छेदिकेति सूचितं। स्व
मस्समासमत्युपेत्य लक्षणे वद्वोषरस्य निधा यातु सुपगमं त्यजति न च पंचशब्द इति। भाष्ये भाषिकेण स्व
रेणेति तस्यार्थः। अत्र मंत्रे प्रथमः पंचशब्द आद्युदात्तः द्वितीयः सर्वानुदात्तः जनशब्दश्चांतोदात्तः तथाच
न द्वितीयपंचशब्दजनशब्दयोः समासाद्दते आकारस्यास्यो दात्तत्वमितरेषां चानुदात्तत्वं यद्यपि तेसमा
न द्वितीयपंचशब्दजनशब्दयोः समासाहृते आकारस्यास्योदात्तत्वमितरेषां वानुदात्तत्वं यद्य टते समा
सस्येति सूत्रेण समासस्यांतोदात्तत्वविधानात् अनुदात्तं पदमेकवर्जमिति सूत्रेण यस्मिन्पदे उदात्तः स्व
रितो वा विधीयते तमेकं विहायशिष्टस्यानुदात्तत्वस्मरणाद्य एवं मंत्रांतोदात्तस्वरवत्त्वात् समासो निरणा
पि भाषिकसंज्ञके तु शतपथब्राह्मणस्वरविधायकग्रंथे स्वरितोऽनुदात्तो वेति सूत्रेण योमंत्रे दृश्यमानमनुदात्तः
स्वरितो वा स ब्राह्मणउदात्तो भवतीत्यपवाद आश्रितः ततआकारादितरेषामनुदात्तानां ब्राह्मणउदात्तत्वं उदात्त
त्रमनुदात्तमनंत्यमिति सूत्रेण च मंत्रदृश्यमानुदात्तस्यानंत्यस्य परसंलग्नतयो च्चार्यस्यानुदात्तत्वं विहितं न त
श्चन कारोपरितनेआकार आकाशश्चेत्यनेनसंलग्नत्वेनोच्चार्यमाणो अनुदात्तो भवतीति चैवमंतानुदात्तस्य
रोविकग्रंथसिद्धो भाषिक इति भाष्यकृतः। पेलुः। छंदोगा बह्वृचाश्चैवं तथा वाजसनेयिनः उच्चनीचस्वरं प्राहुः
स वैषो भाषिके उच्यत इति वचनमुदात्तत्वांतोदात्तो भाषिक इत्याचक्षते। तेषामध्ययनं विरोधः
अंतानुदात्तं हि समाम्नातारः पंचजनपदमधीयत इति हेअज्यत्वा पंचजनानां कृते हे मह्यं गी इति मंत्रकरे शस्यार्थः।

॥ १२१ ॥

नत्वादिना । हेतुकत्वाभावेनाप्यवसायत्वेन । भाष्येष्टाहतामार्यां व्याख्याति मूलेति महानित्यध्यवसायात्मिका बुद्धिरुच्यते ॥
अहंकारोऽभिमानलक्षणः । तन्मात्राणि सूक्ष्मभूतानि । पंचभूतानि स्थूलानि । अहंकारतत्त्वमद्भुततमस्कं प्रकृति
तन्मात्राणां । उत्कटे सत्त्वे त्विंद्रियाणां रजस्त्वहंकारगतं तदुभयप्रवृत्तिहेतुर्नारंकामित्यर्थः । ननु षोडशको
विकार एवेति कथं पृथिव्यादीनां घटादिप्रकृतित्वादत आह । घटादीति । न पृथिव्यादिभ्यस्तत्त्वांतरमिति । उभयेषां
स्थूलत्वेंद्रियग्राह्यत्वतावस्त्रमेतिन तत्त्वांतरत्वेत्यर्थः । आकाशात्मानौ विहाय यापंचविंशतिरुदिता तस्यां नावंति
रत्वेन पंचसंख्यानि वेशरत्वाह नखण्डवित्ति । उद्दिष्टाकाशानां पृथिव्यादीनां ज्ञानेंद्रियेभ्यो घ्राणमादायपू
रणमपुत्के तेषां तस्य वस्तादरणोपाधत्वाद्यादित्याह नापीति । तथा घ्राणातिरिक्तानां ज्ञानेंद्रियाणां कर्मेंद्रिये
भ्यो वाचमादाय पंच संख्यानि वेत्यपेक्षयाह नापि रसनेति । तथोद्दिष्टितवाक्कर्मेंद्रियाणां नमनस्तावत्वल
क्षणत्वाह नापि पाणीति । समासार्थः संख्यांतरेण विशेष्यतरत्तिसाक्षात् सूर्वेवादिनि निरस्ते समासं पंचजनश
ब्देनाभ्युपगच्छतामुत्थापयतीत्याह पूर्वपक्षैकदेशिनमिति । अस्याप्मक्तिप्रायोयघप्यत्रनानाभावाक्संतिपंचप
चसंख्यास्तथापि पंचपंचपूरणत्वादोपंचविंशतिसंख्याया पंचभिः पंचसंख्याभिराविनाभावादिह तानि
दृश्यमानाः स्वं मा..म्महासंख्यां लक्षयंतीति । ननु तत्रापि कथं महासंख्याया अवांतरसंख्याभिः संबंधा
पेक्षा बुद्धिनाशे तन्नाशादित्याशंक्य साह चर्याद्वा वेत्यपेहेतुहेतुमद्भावोक्ती संबंधो लक्षणाबीजमित्याह यद्य

॥ प्रथ ॥

विरहेणात्तत्किं कारणमिति वक्तुं श्रीहिः।ध्यानमेवपो गुक्ष्विति:।नानेत्यक्तमितिज्ञमितिआनुमानिकाधिकरण
इति।नानाविद्यास्वप्येकामिसेके ल्वेजीत्मक्तिप्रायंप्रकरणादविद्यानिश्चयात्।देवात्मशक्तिमितिदेवात्मविष
यांमःपिनंमायाविषयमहेश्वरमित्यर्थः।आप्येवपारमेश्वर्याः शक्तेरितिपरमेश्वरविषयायाइत्यर्थः।एवंच
जीवस्थायाअविद्याविषयंब्रह्मसुक्तंवत्।उक्तंचवाचस्पतिभिर्व्याख्याःस्योतदद्वेदिता॥२॥नसंख्याच।पंच
पंचजनाइतिसांख्यीयतत्त्वपरमुतार्थांतरपरमितियोगरूढ्याविनिगमाद्विशयः।पूर्वत्राध्यात्मप्रकरणे
रूढछागायाजसंबंधाद्रूढानेजआदिकेस्यक्तमिहापिरूढमनुष्यग्रहेवाक्यस्यानिरूढार्थप्रसंगादवयववृ
त्यासांख्यतत्त्वपरतेत्यवांतरसंगतिमधिकरणसंगतिमाहेत्यर्थः।ननूपलजनस्यसंख्यायाःसंख्यांतरे
णाविशेषणायोगात्कथंपंचविंशतिलाभोतआह।पंचजनाइतिहीति।विशेष्यजनैःसंख्यांतरान्वयइत्यर्थः।
नचपंचसंख्यावच्छेदाज्जनानांनैराकांक्ष्यंसंख्यांतरश्रवणेसतिरक्तेपट्याप्येनाकांक्षोत्थापनादिति।वाक्य
स्यानिरूढार्थतात्पर्याभावेहेतुरुक्तःसर्वस्येवेति।आपंतइतिमुलसाजनशब्दव्याख्याननुरूढ्यालोनम
नुष्यसंबंधिनःप्राणादयोळक्ष्यंतातंतथाचननिरूढार्थमतआहतत्रापीतिरूढार्थग्रहेपीत्यर्थः।वाक्यविशेषं
व्यनक्तिकत्रहीति।आत्माकाशाव्यतिरिक्तानांत्रयोविंशतितत्त्वानामपिप्रधानस्यत्रिधाकरणात्पंचविंशति
त्वंस्यात्तेनुतत्त्वेष्वात्माकाशावंतर्भाव्यप्रधानंचापित्वापंचविंशतितत्त्वगुणनेस्यविरोधमाहनचायरते

लक्ष्यमिहेतु त्रिगुणत्वादिनाऽप्रधानप्रत्यभिज्ञानात्स्मरोमं त्र इति पूर्वपक्षमाह प्रधानमेवेति। एकारेति।
अनेन मायायाः प्रतिजीवं भेदाद्देकामित्येकत्वानुपपत्तिरुक्ता। न च गौणत्वं दोषः समत्वादित्याह परेणा
अनेन मायायाः ... कारणशब्दः ... तत्त्वाद्यस्तिकल्पनेत्यस्तीति विभागः। इतर शब्दो नित्य बहुवचनः। तामेवाविद्य
पीति। उपनाद्येनकारणे रोहितत्वाद्यस्तिकल्पनेत्यस्तीति विभागः। प्रधानकार्यमन्तःकरणमित्याह विषया हीति चितिशक्तिरात्मास्त्व
येति। नाप्येतच्छब्दो विषयज्ञानाधारः प्रधानकार्यमन्तःकरणमित्याह विषया हीति चितिशक्तिरात्मास्त्व
पंसुखादिरूपेणा परिणामिनी परिणामिन्यां बुद्धौ वस्तुनोप्रविष्टत्वात् प्रतिसंक्रमविद्यमेतत्सात्त्ाक्षेविपर्य
पंसुखादिरूपेणा परिणामिनी परिणामिन्यां बुद्धौ सत्त्वबुद्धावेवेति शेषः। आत्मत्वेनोपगमेत्येतद्विवृणोति बुद्धिस्थानीतिविप
सेनेति। सांख्यानामप्यस्ति भ्रमः सत्त्वबुद्धावेवेति शेषः। आत्मत्वेनोपपत्तये ऽपवर्गशब्दस्तदुपायपरइत्या
॥१२८॥ यसिसिद्धवेद्यकोन बुद्धिधर्मेना त्मन्यात्तिमन्यमानेत्यर्थः। कृतत्वोपपत्तये ऽपवर्गशब्दस्तदुपायपरइत्या ॥१२८॥
हगुणेति। न चानुवादस्तामस्थ्यां प्रमाणं कल्प्यं विरोधादित्याह। स चेति। व्यवस्थाना छत्रस्वान्तरेणानिर्धार्य
हगुणेति। न चानुवादस्तामस्थ्यां प्रमाणं कल्प्यं विरोधादित्याह। स चेति। व्यवस्थाना छत्रस्वान्तरेणानिर्धार्य
यमाशंक्याह स्थेति। गुणवचनशरोहितादिशब्दैः लक्षणमपि निरूढ यामुख्यवत् प्रलापकः प्रतीतिमपि प्रत्यस
तिमुखार्थसंस्त्रव इत्युक्तं। नन्वजावदजेति गुणवृत्त्यंगीकाराद्रूढिरस्य क्षानेत्याह। आस्तविति। रूढ्याऽपहृते यो
गेनूढार्थ गुणयोगात्सिद्धाद्रूढिराश्रितेति रूढिः स्वीकृता इतरथा गुणयोगस्येवासिद्धेरिति। न केवलं शास्त्रान्तरा
न्निर्णयः प्रकरणादपि स्याकृतपक्षप्रस्तौत्यपि चेति यस्य जगदुत्पत्तौ साध्यायां किं सर्वकारिकारणमिति पृ
च्छतिते त्किं कारणमिति बहुव्रीहिः। ध्यानमेव योगो जीवस्य ब्रह्मणैक्ययोजकत्वात्। आत्मप्राप्तिरुक्तात्म

कस्मात्पुरुषार्थ्येनेति । अर्थक्रियाकारिणि सच्छब्दः प्रयुक्तः पुरुषापेक्षितप्रयोजनकारि महत्तत्वं सत्तत्वं समयो
पिस्वरूपपदेन सामान्यवाचीत्यर्थः । कार्यानुमेयं महत्तत्वमव्यक्तमिति मात्रशब्दः ॥ ७ ॥ गूढ आत्मा अग्निवा
ग्रास्सूक्ष्म वस्तु विषयत्वात् सूक्ष्मा । अशब्दमिति । शब्दादिगुणरहितं अप्रत्यक्षं भौतिकमित्येतत् । अव्यय
मपक्षय रहितं प्राक्प्रध्वंसाभाववर्जितमनाद्यनंतं । अत एव नित्यं । महतः क्षेत्रात्परं क्रमपरिणामिनिवा
प्यमात्मा मृत्युकरतालान्तं मुखं संसारः । स्वर्गादिहितं स्वधर्मं अध्येपि जानासि श्लोक कारण विराट्स्वरूपोपास्य
त्वाच्छ्लोकादिरिव सोऽग्निः । पाः स्वरूपतः यावतीः संख्यातः यथा वाग्निश्चीयते तत्सर्वं नचिकेतसं उवाच । ह
तेऽस्मिन्गुह्यं गोप्यं सनातनं चिरंतनं ब्रह्म हे गौतम ते प्रवक्ष्यामीति । ब्रह्म प्रतिवचनं प्रतिज्ञाय जीवं चाह आत्मा
मरणं प्राप्य यथा भवति तथा च प्रवक्ष्यामीति । योनिमन्ये देहिनः प्राप्नुवंति मनुष्यादिशरीरग्रहणाय अन्ये स्थाव
रं स्थाणुं संयंति कर्मज्ञानानुसारेण । स्वप्नजाग्रतोरंतो मध्ये तु जाये नात्मनानुपश्यति श्लोकः । १ । उरे हे पश्चेतन्यं
तदेवामुत्र परत्र असंसारि ब्रह्म यच्चामुत्र तदेवेह अनुप्रविष्टं वर्तते । यस्तु ब्रह्मात्मनि नानेव मिथ्याज्ञानेन पश्य
ति स मरणात् मरणं प्राप्नोति पुनः पुनर्म्रियते । तावद्वः बोधः कामानां श्लोकं पंतद्वु पृच्छेदिनेश्रेयसो विच्छेदे नह
तवतः ततो विद्यार्थिनं त्वां मन्ये । वेद ज्ञाने अहं पुरुषं ॥ २ ॥ चमसवदविशेषात् । अजा मंत्रः प्रधानपरे उत तेजोबन्न
रूपानां तरप्रकृतिमायारूप परम प्रकृत्योरन्यतरपरत्वे संशयः । अजाशब्दस्य छागातो पक्षस्स्वप्र-
धानमाययोस्तेजोबन्नेव गुणा इति संज्ञा वा । पूर्वत्रार्थतः प्रधानमप्रत्यभिज्ञाया अजावाच्यत्वं पर गम्यते

पदद्वयप्रश्ने ज्ञानेनानंतर्भावोऽन्यत्रधर्मादित्यादेः स्यात् चतुर्थत्वादित्यर्थः। अथ प्रश्नानन्यानुपपत्त्यावरांतरं कल्पयंत
तत्रोत्तरीयेति संतु त्रयोवसाः परमात्मप्रश्नेऽपि स्वेष्वनंतर्भूतोऽस्त्येकपर्याप्तं कांचिद्गृह्णाणेत्य वृत्तीमापि रत्नमात्रं
प्रीत्यादृष्टेनेत्याह उत्तरप्रश्नानांतर्भावरतिमहतः परमथ्य कोमि तिप्रधाना नमास्ति नियोजनास्मकांतेतिचशब्द
एवाहूतैव माल्यादते तिगमयति नेवं महतः परमित्यत्र तमोवरप्रश्नानुसारेणैवार्थप्रतिपादनं स्कंदवसन्
देहादिव्यतिरेकधर्माधिगत्य यथाप्रश्नाज्जीवात् बुद्धिः कृतः प्रश्न इत्यर्थः। अत एवेति जीव परमात्मभेदादित्यर्थः। शोता
युवः पुत्रपौत्रान् वृणीष्वेत्यादिस्तत कामः त्वाहदनो नृपा नचिकेतः प्रष्टेति विशेषणपरत्वात्तृतीयप्रश्नः प्रश्न
॥१२७॥ ता जीवेशः दृष्टेतं दुर्दर्शमिति तिनुद्यति रिक्तः परमात्मप्रतिवचनमात्मप्रश्ने को विद्वान् प्रतिवचनं वदेत्संगतं
अत एक एव जीवप्रश्नः तत्केनेप्रश्नस्यापि जीवस्य परमात्माभेदप्रमित्यर्थत्वेन दृष्टान्यास्यादित्याहयदिदु ॥१२७॥
नरितिः एवं प्रतिवक्रुप्रक्रमाज्जीवपराभेदं साधयित्वा प्रश्नप्रवृत्त्यापि साधयत्यपि चेत्यादिना। तदुत्तरेतस्य
प्रश्नस्योत्तरतमेव विषयं यथावदध्यानानीयादित्यर्थः। पत्प्रश्नेति भाष्ये यच्छब्दो विषयपरोऽनुप्रश्नप. शोविषय
गोरवादिप्रशंसेस्याद्यस्मिन्निति उ आधिकरणाद्वाक्यस्य शाब्दस्य पौरुषेयीनूढिवेदानुपयोगिनीत्य
कमिदानीमहत्वद्वस्यैव वेदविरोधाद्वाव्याख्यानस्य अस्य शाब्दस्य प्रकरणादिना वेदेत्तरीरपरत्वावधारणादि
त्युक्तं तस्मान्नेति सांख्यैः सत्तामात्रेमहच्छब्दः प्रयुक्त इति काव्यमयुक्तं तेषु देवर्महत्वेन स्वीकारादित्याशं

हेतुत्वमकिंचित्करं अपि तस्य वशात् खेऽपीति मप्रतिभासहेतुतेति विशदमशेषं। यत एव ब्रह्माविद्याविजृम्भितएवात्र ल
विषयबोधराहित्यं जीवानामाहेत्यर्थः। उपाधिभूताविद्यैवास्य बोधेऽपि हेतुरित्याह सम्भ्रममिति जीवात्मके
प्यैरनादित्वेनानेयतपौर्वापर्यं नास्तीति न तत्प्रियम इत्यर्थः। तथापि जीवत्वनिपात्मकेष्वके पूर्वत्वमुपचारि
तमित्यर्थः। पश्चाद्वृद्धी वर्द्धमानयेत्युक्ता गामानयेति प्रयोगो गोपदमितरगोविषयमेवमप्यकेपदमित्यर्थः।
प्रकृतेति अप्रसंगेनेतिच्छेदः। अप्यकेपदस्य स्थूलदेहे मुख्यत्वाच्छत्राद्यौपचारिकत्वं यान्त्रवतत्युक्तं सूक्ष्म
क्ष्मतस्य सूक्ष्मस्थूलदेहविषयतया मुख्यगौणत्वे वैरूप्यापातादत आह न वमुख्यपेत अनतसरमितिच्छेदः
उ अन्योपघातनिराकरणाकांक्षायां वकुंस्त्वपुनेकाकपदकाकगतोपघातकत्वं ष्ययथा काकत
दिति रक्षाधारणमेवं पुरुषपरत्वप्रतिपत्तस्यैं तु ष्ये वदाकांक्षितप्रस्फुतशरीरद्वयं छन्न न्यायेनष्ठ अपत्य
व्यकपदं न सूक्ष्ममेवाभिधत्त इत्यर्थः। पूर्वमापाभिधानद्वारा शरीरद्वयलक्षणोक्ताइदानीं नु सूक्ष्मशरीराभि
धानद्वारेणएवमपि हि प्रधानं निरस्तं भवतीति। त्वक्मांसरुधिरादिमान् अस्थिस्नायुमज्जानः पि
तृनः एते जदकोशोशार जलाकौषिकं। व्यवहितं जीवविषयं प्रतिवचनमितिभाष्यस्य व हितं पदा
र्थमाह इत्थे नेनेति। हंतेत्यादि सनातनमित्यंतं परमात्मप्रतिवचनप्रतिज्ञा वाक्यं तेन व्यवहितं पद्येता
दिजीवप्रश्नस्य प्रतिवचनमित्यर्थः। प्रश्नाभेदे दूषणमाह एकत्वेतिमाँहि अन्यत्रात्मविद्ययोर्हित्वात् सू
त्रस्थत्रिशब्दविरोध इत्यर्थः। परमात्मप्रश्नस्य जीवप्रश्नाद्भेदेऽपि तुः सौमनस्यादिना आत्मज्ञानाविषयं

द्विति चेन्न बिंबस्याच्छरूपातिरेके कल्पितत्वात् अनतिरेके स्वरूपस्यैव निरवद्यत्वात् मुखमात्रस्य तूपाधियो
गःपारिच्छिन्नत्वाद्यविरुद्धः। अपि च दर्पणाद्युपाधे विषय एव मुखं नाश्रयः। ननु निर्विशेषब्रह्मस्वरूपस्यावि
द्यासंबंधसंभव इत्यना। ईजीवाविद्ये परस्पराधीनतयाऽविद्यातत्संबंधवदुपेयेरति येत्वादुर्ब्रह्मणो जीवभ्र
मगोचरस्यादित्यधिष्ठानतयोपादानत्वे सोऽकामयत स्वयमकुरुतेति च न स्यात्त्वाति जीवं च भ्रमासाधारण्यान्नाज्ञ
त्साधारण्यानुभवविरोधः भ्रमजनस्य चाकाशादेरज्ञातसत्त्वायोगस्तस्मादीश्वरप्रतिबिंबधारिणी साधा
रूपी माया तदुपहितो जीवोपाधिर्योऽविद्या मंतव्या इति तान् प्रति ब्रूमः अकामयत अकुरुतेति सकाम कृती जी
॥१२६॥ वाविद्याविवर्तः न ब्रह्मविक्रिया विवर्तश्च विवर्तहेतुः सर्प इव विसर्पणस्य प्रतिमाणककवर्यविद्यादिवर्णे
भुस्वरादिवैविशेषेन कृतस्यो यथाध्याय वक्रे इति वेदस्य वप्रपंचसाधारण्यप्रसिद्धिः। अधिष्ठानवर्णसा ॥१३६॥
धारण्यात्तत्साधारण्यं प्रकृतेऽपि समं सर्वप्रत्यक्त्वाद्ब्रह्मणः अज्ञानसत्त्वं तु प्रपंचस्य व्यावहारिकसत्त्वात्।
न च जीवाविद्याजत्वे तदयोगः स्वप्नादिवदुपपत्तेः पतंजीवस्य मनोवाच्छिन्नत्वं भूतसूक्ष्मावच्छिन्नत्वं च दृवि
तं तदस्यादि दृममेव वेदितं अस्मात्ते जीवस्यानाद्यविद्यावच्छेदाभ्युपगमात्तदिति अपि च। न मायाप्रतिबिंबस्य
विमुक्तै रूपसंपत्ता। अवच्छेदानंतत्वज्ञानात्सर्वविज्ञानसंभवः। अधिष्ठाने तु जीवैरविद्याभिरुपादानै।
जामद्भुमप्रासिद्धौ किं साधारण्येऽप्यमायया। गृहीतृस्थायामप्यविद्यापायात्स्वे ब्रह्मणि स्वसमंजउभयत्रास

मात्रस्य प्रकृतरथिग्रहणहेतुत्वाभावादित्याह तत्रेत्यभिज्ञानादिति। इंद्रियद्वारा बुद्धिस्थभोग्याकारतः पुरा
सामर्थ्यं भोग्याश्रयत्वं। आपनाद्यात्मेः। बुद्धिमात्रादस्मदादिवुद्धेः। ननु शब्दिनः संसारिणः कथमसंसार्यात्मत्वेन
निर्देशोत आह यथा हीति। अंबरस्य वरांगछति। त्ताप्योदात्तता यंयच्छेद्वाऽन्नं नसीं। तिश्रुतौ वाच्छेदे द्वितीयाव्योपः छां
दस इत्यर्थः। शरीरमेव रूपकेणरथेन विन्यस्तं रूपितमिति सूत्रपदार्थः। अनुशयोऽसंतोषः। मत्सरसोमंश्रीणीति
मित्रयेत्। एवं सतीति कार्यकारणाभेदे सतीति कार्यकारणाभेदे सतीत्यर्थः। सेश्वराणामीश्वरादनीश्वराणां जी
वेभ्य इति संबंधः। प्रमाणेनोपपन्नतेन निरूप्यत इत्सव्यक्तत्वमित्यर्थः। तदाश्रयत्वात्तद्विषयत्वादित्यर्थः। आधार
द्या। वाची आश्रयशब्दः अविद्यके निष्फमादाशंकतेस्यादेतदिति। अविद्याब्रह्मगतानिवर्तते न वाप्र्य्यमे सर्वयुक्तिः
द्वितीयेमुक्तानांपुनर्बंध इति। अविद्यादाहमुपेत्य सर्वमुक्तेरापादनाद परिहारत्वमाशंक्यभाष्यभावमाह।
यान्निति। पूर्वपूर्वभ्रम कृप्तेताप्रधानेनात्मनोऽविवेकसत्त्वाद्दाविवेकप्रतियोगीत्वेनापि कृतं प्रधाने नेत्यर्थः।
यद्यविद्यानानाकथं तर्हि श्रुता वव्यक्तमिलेकवचनमित्यत्र आह अविद्यात्वेति निमित्ततयेति प्रेरकतयाऽज्ञ
विद्याविषयत्वेन वतत्प्रेरकत्वं गंधस्येव घ्राणं प्रतिउपादानतयेति जगदुपादानतयेत्यर्थः। विद्यारूपभाव
रातिनिरवद्यमिति श्रुतत्वगतनिर्दोषत्वतानात्मत्वं विद्यारूपभावत्वं। एवं च विद्रूपत्वं जीवेपि तत्त्वमसिवाक्यजप्रमाद
पत्वं जीवेपि मत्सिद्धमिति केषांचिदाक्षेपोनवकाशः। स्वरूपमविद्याश्रयो विवेतु ब्रह्मनिरवद्यमितिकिंमत्स्या
स्य

शरीरस्य अव्यक्तशब्दोऽपि योगिकत्वादनिर्धेयविशेषाकांक्षीत्यत आह चेष्टोपात्तेंद्रियार्तें घाभिधानुमत्क्षमः शरीरी

कांक्षीति शरीरमेवाप्यक्तशब्दार्थ इति। विषयांस्तेषु गोचरानितिक्रनिर्व्याचष्टे तेष्विति विषयानुद्दिश्यमार्गत्वं अ.१ पा.८

विधेयं स्वगोचरमात्रं व्यवच्छिनत्तीति विप।रिण तानुषंगः। आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इत्येतद्व्या

चष्टे आत्मेति। युक्तमिति भावे निष्ठा। क्रियाविशेषणं चैतत्। तदेव दर्शयति योग इति। प्रकरणपरिशेषाभ्यामित्युक्तं न

नु प्रकरणं कर्मस्यस्येति कर्तव्यताकांक्षस्य वचनं कथमिह तदित्याशंक्याह प्रधानस्येति। प्रधानस्येत्युक्ते कर्थ

दाकांक्षांग विषयेति सिध्यति कीदृशमानुगतं लक्षणमिदमेवेत्यर्थः। किं प्रधानमत आह गंतव्यमिति। इंद्रिया

॥१२५॥ दयश्च तस्य परत्वप्रतिपत्तावंगं संयतात्मत्वेन तत्राप्तावपि। परत्वविज्ञानवानित्यादि श्लोकेनैभाष्येवास्तं यमाभिधान ॥१२५॥

मनुपयोगी स्यादाशंक्याह असंयमेति। संयमाभावे मोक्षाभावेन तद्भावे तद्भाव एव दृढीकृत इत्यर्थः। यदुक्तं पूर्व

वाद्दिनामहतः परमित्यत्र परशब्दः कारणवचन इति तत्राह परशब्द इति। मन आद्यवर्थादिकारणत्वासंभ

वादस्मिन् प्रकरणे परशब्दः श्रेष्ठवचन इत्यर्थः। इहाध्यात्मप्रकरणे आंतरत्वाच्छ्रेष्ठं च कथ्यते इत्यर्थेत्वनात्सी

तिसंशंकते नन्विति नाम नशब्दोवागस्ति व्यंग्यः सएव श्रोत्रेणग्राह्य इति द्विरूपातः। कामो मनसो विषयः। कर्म

हस्तयो। ननु मनस इंद्रियत्वेनार्थेभ्योऽपरस्य कथं तेभ्यः एव परत्वमत आह प्रहत्वेनेति। आत्मानं राथिनं

इत्यत्र य आत्मशब्दः स एव बुद्धेरात्मेत्यत्र प्रसज्ज्येतापन इत्यभिप्रायेणात्मशब्दादिति भाष्यमन्यथात्मशब्द

त्वात् घटवत्। सत्कार्यवादे प्राक् कार्योत्पत्तेरव्यक्तं कार्यवत्त्वात् कारणे मृदादाविव सक्तं शब्दप्रयोगः इति साध्यवैकल्यं
अन्यत्रापि तावेव प्रतिज्ञाहेत्वानो संभवेयातां। तदनुरागिविज्ञानवेदनीयत्वात्। यद्येन समन्वितमिति सामान्ये
नात्र व्याप्तिः। कारणशक्तितः कार्यस्य दृष्टेस्तेः कारणगतामक्तकार्ये हि शक्तिरित्यर्थः। इदमस्य कारणमिद
मस्य कार्यमिति विभागात्। अव्यक्ते कार्यसत्त्वरहितस्य नृशृंगवत् कारणत्वायोगादित्यर्थः। प्रलयस्थायां वै
श्वरूप्यस्याविभागात् लीनानन्तिमित्ता कार्यायोस्त्यव्यक्तमिति। अव्यक्तपदे किं किंरूढिः प्रधानप्रतीति
योगाद्वा स्मार्तक्रमानुगृहीतयोगाद्वा नाद्य इत्याह लौकिकीति। य एव लौकिका इति शाबरं वचः। लौकिकवैदयोः
शब्दार्थभेदो लौकिकाद्वैदिकारति व्यपदेशके शादेतद्दैव्यं मधु यत् घृतमिति देव मधु नो घृतत्वाभिधाना
च्चेति प्राप्ते पेनाक्षालितं। लोकावगतसंबन्धशब्दानां वेदे बोधकत्वोपपत्तेरैक्ये न च प्रसिद्धिज्ञानात् यद्यते मधुत्व
स्कलत्वं लाघवं कंशब्दार्थयोरिति। द्वितीयं प्रत्याह योगस्त्विति। तृतीयं निराकरोति प्रकरणेति। अयं भावः इह वि
ष्णोः परं पुरुषः प्रधानं तत्प्रतियसंगानीन्द्रियादीनि इन्द्रियेभ्यः पराह्यर्था इत्यादिनानिर्दिश्यन्ते। तानि चात्मानं रथिन
मिति वाक्ये रथादिरूपितान्यनुगृह्यन्ते। एवं स्थिते महतः परमव्यक्तमित्यत्र पौरुषेय वाक्यस्थपदार्थतत्क्रमापेक्षये
प्रधानप्रत्यभिज्ञा दुर्बला प्रकरणाधीनपदार्थाश्रयत्वात् सन्निधेयाकांक्षाश्रयत्वात् सन्निधेयाकांक्षाश्रयत्वाच्च या
द्विशेष्य निमित्ता शरीरप्रत्यभिज्ञा प्रबला तथाहि रथत्वेन रूपितं शरीरं पुरुषपरत्वप्रतिपादकवाक्यान्वय
मपेक्षते। इतरथा निष्प्रयोजनत्वात् नव सन्निधेयावरुद्धा इन्द्रियादिशब्दाः सन्निधेयदेतीतस्याव्यक्तशब्दापेक्षा

अ.१ पा.३ समाप्त

इतिश्रीमदनुभवानंदपूज्यपादशिष्यपरमहंसपरिव्राजकभगवदमलानंदविरचिते वेदांतकल्पत
रौ प्रथमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ श्री आनुमानिकमपि। अर्वाचीनमहत्तत्त्वरूपेणापूर्वकालत्व
प्र७ मविशिष्टं कूटस्थमव्यक्तस्य परस्य इह आहुतत्वाच्च कारणत्वसिद्धिः नियत प्राक् सत्त्वं हि तद्धि सर्व्वः। ननु सिद्धे ग
तिसामान्ये काशंका महतः परमित्यादिवाक्यार्थनिर्णये वाक्यं गतिसामान्यसिद्धिः। उच्यते। अस्ति धी
प्रतिवेदांतं ब्रह्मकारणतागतिः प्रतिवाक्यं तत्सिद्धिः क्वचित्कार्ये दर्शनात्। पूर्वत्र हि प्रधानाद्येव सर्व
वेदांतार्थ इति प्रत्यवस्थिते तन्निषेधेन सर्ववेदांतेषु ब्रह्मावगतिः साधिता इह तु तामुपेत्य प्रधानाद्यपि कार
॥१२५॥ णत्वेन समन्वयति [illegible] यः। न दानेककारणवैरूप्यं [illegible] मे देनमवस्थोपपत्तेरिति प्रत्यवस्थीयते। सूत्रकारो ॥१२५॥
प्यपि शब्दमेकेषां पदं प्रयुंजानो ब्रह्मयोगीकारेण पूर्वपक्षः [illegible]। विलक्षणापंकिनार इति सूत्रयांचकार। अव्यक्त
पदं प्रधानपरं शरीरपरं वेति स्मार्तक्रमश्रौतपाठरिरे कान्यो मुखयोः प्रत्यभिज्ञानात्संशयः। सांख्यानां
सम्मतयोरनुमानसिद्धानुवादित्वेन तुल्यता। भाष्ये स्मृतिप्रसिद्धस्य सांख्यस्मृतिप्राप इत्याह सा ख्येति। शब्दादिहीन
त्वादिति भाष्ये गुणवैषम्योत्तरकालभाविशब्दादिहीनं अनुक्तं प्रधानकाले पि सूक्ष्मशब्दादिभावादित्याह शा
रा तेति। शांतः सात्त्विकः घोरो राजसः मूढस्तामसः। प्रकृतिस्थानि स्याप्येतिभाष्यं माख्यातिप्रकृतिरिति। जेषानां महदा
दिविशेषाणां कारणमव्यक्तमस्तीति संबंधः कुतः परिमाणात् परिच्छिन्नत्वात्। महदाद्यव्यक्तकारणकमव्यापि

चतुर्थ पाद प्रारंभ

शास्त्रार्थादि विषयशङ्कात्प्रकर्षोऽस्ति अत आह संकुचद्वृत्तिरिति। ननु भेदेन जीवपरत्वपदेशे वाक्यानि दृश्यन्ते न आ
हुष्ठो कश्चिद् मनूद्यते। न च्चिन्निष्ठाच वादनुवादस्त्वव ... वतु नेत्याह नात्विति। नन्व ... त्यासा जीवपरत्वं वाक्यस्य
नेत्याह नत्र एवेति। एतत् एवानुवादमात्रमनर्थकमत एव प्राणादिविवेकार्थमुपक्रमे जीववर्णनं स्वप्नादेर्मोक्षि
कारित्वाद्दनात्मधर्मत्वार्थमुथ्यते निर्देशः अन्ते च शोधितं जीवं परामृश्य तस्य ब्रह्मत्वं बोध्यत इति विवेकः। उपरि
तन वाक्यसंदर्भो अत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यादि। वशीशब्दं व्याख्याति वश इति। वशः शक्तिरस्यास्तीति व
शी। फलितमाह सर्वस्य जगत इति। अयमीश्वरः सर्वस्य जगतः प्रभवति प्रभुर्भवति प्रभावं प्रकटयतीत्यू
हेतिव्यूहेन विभागेन ब्रह्मणो व्यवस्थापने साध्ये समर्थ इत्यर्थः। शाकस्य तथैव करणं सर्वेशानपदार्थः। कृतं
जगत्प्रतिनियं तृत्वं सर्वाधिपतित्वं। विज्ञानमन्तःकरणं तन्मयः तत्प्रायः प्राणेषु हृदीति व्यतिरेकार्थे सप्तम्यौ
प्राणबुद्ध्यतिरिक्त इत्यर्थः। अन्तरिति बुद्धिवृत्तेर्विविनक्ति। ज्योतिरित्यस्य त्वा नादिनीति पुरुषः पूर्णः यो यमेवं भू
तः स आत्मेति याज्ञवल्क्यो यं प्रति वचनं कतम आत्मेति जनक प्रश्नानन्तरं अन्वारूढो ऽधिष्ठितः उत्सर्ज
द्वनान्तः शब्दं कुर्वन्। ढुहौ ध्यायंत्यां ध्यायतीव चलं त्यां चलतीवाबुद्धान्तः जाग्रत्। अतः कामादिविवेका
नन्तरं विमोक्षायैव ब्रूहीति जनकः इत्युक्ते तेन जाग्रद्योगादिना अनन्वागतो भवति असंगत्वादेवेति प्रतिवाक्य
याज्ञवल्क्यः। तदा सुषुप्तौ हृदयस्य बुद्धेः संबन्धिनः शोकांस्तीर्णो भवति॥ ॥१७३॥

द्भूतं मावत् ब्रह्म तद्वपि नैव निर्वोढृ इत्यर्थः। एवं च ब्रह्मशब्दश्रुतिरपि ब्रह्मण्येव नाकाशादेः स्फुटं। अ
जिह्मा नास्ति येषां नामरूपनिर्वाहकत्वं लिंगं तत्त्वंतन्नकाशसि सत्वपूर्वकाशत्वात् त्वेद्यष्टत इत्याह नचेति। नाम
रूपकर्तृत्वेन वाक्यांतरगत ब्रह्मप्रत्यभिज्ञामाहाने नेति। नन्वनेन जीवेनेत्यत्रानुप्रवेशव्याकरणयोः स्वकाप्रत्य
येनैककर्तृत्वं प्रतीयते ऽनुप्रवेशो च जीवः कर्तेति स एव व्याकरणेपि कर्ता स्यात् तथा च नभ्यो कर्तृत्वादिह ब्रह्म
प्रत्यभिज्ञान आह ब्रह्मरूपतया चेति। जीवस्य व्याकर्तृत्वप्रतीतावपि न विरोधस्तस्य ब्रह्माभेदादित्यर्थः॥४०॥१२॥
सुषुप्त्युत्क्रांत्योर्भेदेन। अत्र विज्ञानमयशब्दादुपसंहारस्थप्रवेशानादिशब्दाच्च विशयः। अंगुष्ठमात्र इत्यत्रोप
॥१२७॥ क्रमोपसंहारयोर्जीवश्रुत्या तुल्य इ सगतार्थता पूर्वत्र नामरूपाभ्यां भेदव्यपदेशात्कोदेशो ब्रह्मेत्युक्तं तत्र भेद
व्यपदेशोऽनेकांतः स्वेजो त्यपि भेदे प्राज्ञेनात्मना संपरिष्वक्त इति भेदोपचारदर्शनादित्याशंक्यात्रापि मुख्य ॥१२७॥
भेदपरत्वसाधनात्संगतिः पूर्वपक्षमाह आदाविति। आद्यंतेन विज्ञानमयशब्दात् मध्ये स्वप्नाद्युक्ते संसा
रिपरत्वे सति महान् इत्यादि सर्वं संसारिण्येव योज्यत इत्यर्थः। संपिंडितार्थविषयस्तं वंधकृतत्वविच्छिन्नपाभावात्
घनीभूतप्रज्ञायस्य सतथा संसारे वानूद्यत इति। अनुवादप्रयोजनं कर्मापेक्षितकर्तृस्तुतिः। नन्वसिद्धे
श्वरे धर्मिणि भेदव्यपदेशोस्ति इत्याशंक्याह अयमात्मेति संधिरिति। द्वितीयं विकल्पं निरावष्टे नचात्रेति। नन्वात्म
शब्दो जीवस्यात्मवचन इत्युक्ते तत्कथं तद्व्यतिरिक्तेश्वरव्यपदेशस्तत्राह नचप्राज्ञस्येति। ननु जीवस्यापि

त्वा श्रुतस्यानुपपत्तिरिति तत्राह तस्मादिति। आदित्यमुपसंपद्येति व्याचष्टे सूर्यन्नां मध्ये ब्रह्मलोकप्राप्तियवा
यां कारणत्वकृतत्वेनां जस्यं तु ब्रह्मणि स्यर्थः। तदेवं प्रकरणाच्छ्रुतिभंगं विधाय श्रुतिबलाद्दृष्याह अपि चेति।
नचोत्तमः पुरुषः प्राप्ता नतु प्राप्यं ज्योतिरिति कार्यं परत्वेन विशेषितस्य ज्योतिष एवोत्तमत्वेन विशेषणं योग्यत्वा
दिति। भाष्ये प्रकरणादिति द्युसंबंधप्रसक्ति ज्ञानस्य ब्रह्मणो यच्छब्देन परामर्शादित्यर्थः। अथ य एतादृक्ष्य ना
ड्यस्तिनाडी स्वं उ अथ विशेषविज्ञानोपरमानंतरं यत्र काले एतदिति क्रियाविशेषणं एतदुत्क्रमणं करोतीति अथ
तदैतैरेव रश्मिभिरूर्ध्वमुत्क्रमते उपरिगच्छतीत्युपक्रम्य आदित्यं गच्छतीति श्रुतं।। ४०।। ११।। आकाशः शात्। अत्राका
श ब्रह्मश्रुतिभ्यां संशयः सर्वाणि भूतान्याकाशादेव समुत्पद्यंत इत्यत्र हि सर्वं जगदुत्पत्तेरेवकारावगतनिर
पेक्षकारणत्वस्य प्रश्नप्रत्युक्तिसामानाधिकरण्यसामर्थ्यस्य च दर्शनात् ब्रह्मपरत्वेन वसिष्ठे संगतार्थत्व
माह तथापीति। हेतुनामप्रसिद्धे भूताकाशो न तु ब्रह्मेति वक्ष्यमाणेनान्वयः। अनंतराधिकरणे नागतार्थत्वसंगती
वक्ति अकस्माच्चेति। पूर्वत्र हि प्रकरणादनर्थकः हतश्रुतिर्नीताः इह तु न ब्रह्मप्रकरणं नाप्याकाशश्रुतेरानर्थक्यं
नामरूपाधिष्ठानब्रह्मप्रतिपत्त्यर्थत्वादाकाशस्येति भावः। तर्हि नामरूपान्यत्वं ब्रह्मणो लिंगं ब्रह्मशब्दश्रुतिश्चने
त्याह नामरूपेऽइति। नामरूपे अंतरा ब्रह्मेति श्रुतिर्नामरूपयोर्निर्वोढृत्वं हि नु केशाकाशस्यांतराळत्वं नास्वबद्धे किं नु
ब्रह्मणः ततः किमत आह तेनेति। निषेधमुखेनैतदेव विशदयति न त्विति। निर्वोढृत्वमाकाशस्य तेनेवब्रह्मांतरा

दहरोपसनानुवादस्य च निश्चयो ऽनन्त्वमित्यर्थः। नाद्वितीयरस्याहृतचैतदिति। उपसद्दोऽवछेत्तुं विश्वा
तोऽस्त्रित्वद्वादशत्वयोर्विकल्पापत्तरित्यर्थः। समुच्चये पंच दहरोपासनापत्तेः तिस्र एवेत्येवकारविरोधश्चेति।
